वाग्भटालंकारः ।

(वाग्भटकृतोलंकारग्रंथः)

प्राचीनटिप्पनसमेतः ।

ग्रन्थोयं

श्रीकृष्णदासात्मजखेमराजेन

मुंबय्यां

स्वकीयेश्रीवेंकटेश्वरयंत्रालये

मुद्रितः ।

शके १८१६ संवत् १९५१ ।

इस पुस्तकका रजिस्टरी हक यन्त्राधिकारीनें स्वाधीन रक्खाहै.

वाग्भटालङ्कारः।

प्रथमःपरिच्छेदः।

श्रीर्जयति॥ श्रियं दिशतु वो देवः श्रीनाभेयोजिनस्सदा॥मोक्षमार्गं सतां ब्रूते यदागमपदावली ॥ १ ॥ साधुशब्दार्थसंदर्भं गुणालंकारभूषितम् ॥ स्फुरतीतिरसोपेतं काव्यं कुर्वीत कीर्तये ॥ २ ॥ प्रतिभा कारणं तस्य व्युत्पत्तिस्तु विभूषणम् ॥ भृशोत्पत्तिकृदभ्यास इत्यादिकविसंकथा॥३॥ प्रसन्नपदनव्यार्थयुक्त्युद्बोधविधायिनी ॥ स्फुरंती सत्कवेर्बुद्धिः

---

१ यत्सिद्धान्तग्रंथपरंपरायस्यग्रंथपदावली सतां साधूनांमोक्षमार्गंब्रूते. अन्यापि पदावली मार्गं कथयते। २ वाऽस्यप्रयोजनवत्वमित्याह साध्विति। ३ प्रतिभाकोर्थः विविधशास्त्रज्ञानम् यद्वा प्राग्जन्मसंस्कारजन्यापूर्वापरानुसंधानरूपाबुद्धिः प्रतिभा। ४ काव्यस्य। ५ विविधशास्त्रज्ञानं। ६ अभ्यासः शीघ्रोत्पादनकर्त्ताभवति। ७ इत्यादि सर्वं कवीनां वार्त्ता शिक्षावा। ८ प्रसन्नेति सुललितपदनवीनार्थयुक्तिप्रकाशकारिणी।

प्रतिभा[1] सर्वतोमुखी ॥४॥ शब्दधर्मार्थका
मादिशास्त्रेष्वाम्नाय[2]पूर्विका ॥प्रतिपत्ति[3]र
सामान्या व्युत्पत्ति[4] रभिधीयते ॥ ५ ॥
अनारतं गुरूपांते यः काव्ये रचनादरः॥
तमभ्यासं विदुस्तस्य क्रमः कोप्युपदि
श्यते ॥ ६ ॥ बिभ्रत्याबंधचारुत्वंपदाव
ल्याऽर्थशून्यया ॥ वशीकुर्वीत काव्याय
छन्दांसि निखिलान्यपि ॥७॥ पश्चाद्गुरुत्वं
संयोगाद्विसर्गाणामलोपनम् ॥ विसंधि
वर्ज्जनं चेति बंधचारुत्वहेतवः ॥८॥यथा॥
शिते कृपाणे विधृते त्वया घोरे रणे कृते॥
न्त्रंधीश क्षितिपा भीता वनएव गता ज-

---

१ प्रज्ञानवनवोन्मीलदित्यादिलक्षणलक्षिता सर्वत्रावगाहिनी सत्कवेर्बुद्धिः प्रतिभा स्यादित्यर्थः । २ गुरुसम्प्रदायपूर्विका। ३ परिज्ञानम् । ४ व्याकरणसंहिताद्दण्डनीतिवात्स्यायनादिषु तेषुज्ञानं व्युत्पत्तिर्भवति । ५ न्त्रधीशेतीत्थं संयोगो न क्रियते वने एव इति विसंधिर्ज्ञेयः गता अत्र विसर्गाणांलोपनं कृतं इत्थं न क्रियते नूतनकवित्वे इतिभावः असंयोगेऽधीशेति गुरुः क्षितिपा भीता गता इति विसर्गलोपः ।

वात् ॥९॥ अनुल्लसत्यां नव्यार्थयुक्ताव
भिनवत्वतः॥ अर्थसंकलनातत्वंमभ्यसे-
त्संकथास्वपि ॥१०॥ यथा ॥ आगम्यतां
सखे गाढमालिंग्यात्र निषीद च ॥ संदिष्टं
यन्निजभ्रातृजायया तन्निवेदय ॥ ११ ॥
परार्थबंधाद्यस्तु स्यादभ्यासो वाच्य-
संगतौ ॥ स न श्रेयान्यतोनेन कविर्भ-
वति तस्करः ॥ १२ ॥ परकाव्यग्रहोऽ
पि स्यात्समस्यायां गुणः कवेः ॥ अर्थं
तदर्थानुगतं नवं हि रचयत्यसौ॥१३॥
मनःप्रसत्तिः प्रतिभा प्रातःकालेऽभियो
गिता ॥ अनेकशास्त्रदर्शित्वमित्यर्था-
लोकहेतवः ॥ १४ ॥ समाप्तमिव पूर्वा-

---

१ तत्वंकोऽर्थः अर्थप्रयोजनस्वरूपम् । २ संकथासु कोर्थः वार्त्तास्वपि । ३ तदुक्तं– परस्यकाव्यं स्वमिति ब्रुवाणो विज्ञायते ज्ञैरिह काव्यचौरः ॥ विलोक्य माणिक्यमयोग्यहस्ते प्रत्येति को नाम यदेतदस्येति । ४ मनःप्रसन्नता चित्तायत्तं धातुबद्धं शरीरं नष्टे चित्ते धातवोयांतिनाशम् ॥ तस्माच्चित्तं सर्वथा रक्षणीयं स्वस्थेचित्ते वुद्धयः प्रस्फुरंति अत्रायमभिप्रायः चित्तं स्वस्थं विधाय काव्यरचनां रचेदिति भावः । ५ उद्यमः ।

र्हं कुर्य्यादर्थप्रकाशनम् ॥ तत्पुरुषो बहुव्रीहिर्न मिथः प्रत्ययावहौ ॥ १५ ॥ एकस्यैवाभिधेयस्य समासं व्यास मेव च ॥ अभ्यसेत्कर्तुमाधानं निः शेषालंक्रियासु च ॥ १६ ॥ स्यादनर्द्धान्तपादांतेप्यऽशैथिल्ये लघुर्गुरुः ॥ पादादौ न च [1]द्रव्याश्चादयः प्रायशो बुधैः ॥ १७ ॥ भुवनानि निबध्नीयात् त्रीणि सप्त चतुर्दश ॥ अप्यदृश्यां सितां कीर्तिमकीर्तिं च [2]तोऽन्यथा ॥ १८ ॥ वारणं शुभ्रमिन्द्रस्य चतुरः सप्त वांऽबुधीन् ॥ चतस्रः कीर्त्तयेद्वाऽष्टौ दश वा ककुभः क्वचित् ॥ १९ ॥ यमकश्लेष चित्रेषु बवयो र्डलयो र्न भित् ॥ डलयो रलयोर्वाऽपि णनयोरपि कुत्रचित् ॥ २० ॥ नाऽनुस्वारविसर्गौ तु चित्रभं

---

१ संदेहजनकौ । २ अतोद्वितीयपादांततृतीयपादयोः संधिर्नकार्य्यः अशैथिल्ये सति अपिशब्दात् द्वितीयचतुर्थपादांते लघुर्गुरुर्भवत्येव ।

गाय संमतौ॥यमकोदाहरणं—शंकमानै-
र्महीपाल कारागारे विडंबनं ॥ त्वद्वैरिं
भिःसपत्नीकैः श्रितं बहुविडंबनम्॥२१॥
श्लेषोदाहरणम् ॥ त्वया दयार्द्रेण विभो
रिपूणां न केवलं संयमिता श्च बाँलाः ॥
तत्कामिनीभिश्च वियोगिनीभिर्मुहुर्म-
हीपाल विधूसरांगाः ॥ २२ ॥ देव युष्म
द्यशोराशिं श्रोतुमेनं जडात्मकम् ॥
उत्कंठयतिमां भक्तिरिन्दुलेखेव साग-
रम् ॥ २३ ॥ चित्रोदाहरणम् ॥ चन्द्रैंडितं
चटुंलितस्वरधीतसारररत्नासनं रभसक
लिपतशोकजातम् ॥ रत्नानि पापति
मिरक्षयकारकायमलपेतरामलतपः क-
चलोपलोचम् ॥ २४ ॥ भावकानमनम
त्तेभभग्नमायातमःप्रभ ॥ विनयात्त्वां
स्तवे वीर विनतत्रिदशेश्वर ॥ २५ ॥

---

१ हे राजन् । २ अत्रबवयोर्डलयोरैक्यम् । पक्षे बहूनिप-
त्रेत्यर्थात् । ३ सस्त्रीकैः त्वच्छत्रुभिः । ४ अत्ररलयोरै-
क्यम् । ५ चन्द्रेडितंचात्रडलयोरैक्यमिति । ६ चटुलितं स्व-
रापठितं बलस्येंद्रस्य रत्नासनं येन ।

हारबन्धचित्रम् ॥ प्रचण्डबलनिःकाम प्रकाशितमहागम ॥ भावतत्वनिधे देव भालमत्राऽद्भुतं तव ॥ २६ ॥ छत्रबंध चित्रम् ॥ जनस्यनयनस्थानध्वानमेनं छिनत्त्विनः ॥ पुनः पुनर्जिनः पीनज्ञान ध्यानघनस्सनः ॥ २७ ॥ गोमूत्रिकाषो डशदलपद्मबंधावेकस्मिन्नेव ॥ अधीत्य शास्त्राण्यभियोगयोगादभ्यासवश्यार्थ पदप्रपंचः ॥ तं तं विदित्वा समयंकवी नां मनःप्रसत्तौ कवितां विदध्यात् ॥ २८ ॥ इति वाग्भटालंकारे प्रथमः परिच्छेदः १

द्वितीयःपरिच्छेदः ।

संस्कृतं[1] प्राकृतं[2] तस्याऽपभ्रंशो[3] भूत भाषितम् ४ ॥ इति भाषाश्चतस्रोऽपि यांति काव्यस्य कायताम् ॥ १ ॥ सं स्कृतं स्वर्गिणां भाषा शब्दशास्त्रेषुनि श्चिता । प्राकृतं तज्जतत्तुल्यं देशेया

---

१ संकेतं । २ तस्मात्संस्कृताज्जातं शुद्धप्राकृतमित्यर्थः । शूरसेनी मागधीच ।

दिकमने कधा ॥२॥अपभ्रंशस्तु यच्छुद्धं तत्तद्देशेषु भाषितम् ॥ यद्भूतैरुच्यते किञ्चित्तद्भौतिकमिति स्मृतम् ॥ ३ ॥ छन्दोनिबद्धमच्छन्द इति तद्द्वाङ्मयं द्विधा ॥ पद्यमाद्यं तदन्यत्तु गद्यं मिश्रं च तद्त्रयम् ॥ ४ ॥ अदुष्टमेव तत्कीर्त्यै स्वर्गसोपानपङ्क्तये ॥ परिहार्य्यानतो दोषांस्तानेवाऽऽदौ प्रचक्ष्महे ॥५॥ अनर्थकं१ श्रुतिकटु२ व्याहतार्थ३मलक्षणम् ४॥ स्वसंकेतप्रकृतार्थ५मप्रसिद्धमसंमतं७ ॥६॥ ग्राम्यं८ यच्च प्रजायेत पदं तन्न प्रयुज्यते ॥ क्वचिदिष्टा च विद्वद्भिरेषामप्यपदोषता ॥ ७ ॥ युग्मम् ॥ प्रस्तुतेऽनुपयुक्तं यत्तदनर्थकमुच्यते ॥ यथा विनायकं वन्दे लम्बो

---

१ गद्यपद्यमयंचंपूकथादि गद्यपद्यमयीवाणी चंपूरित्यभिधीयते ॥ यद्वा संस्कृतप्राकृतयोर्द्वयं नाटकादिमिश्रं । २ यत्पदमनर्थकंजायेत श्रुतिकटु कर्णकटु जायेत इति प्रत्येकं सम्बन्धः। ३ अनुकरणादौ इत्यर्थः ।

दरमहं हि तु ॥ ८ ॥ निष्ठुराक्षरमत्यन्तं बुधैः श्रुतिकटुस्मृतम् ॥ एकाग्रमनसा मन्ये त्वष्टेयं निर्मिता यथा ॥ ९ ॥ व्याहतार्थं यदिष्टार्थबाधकार्थान्तराश्रयम् ॥ रतस्त्वमेव भूपाल भूतलोपकृतौ यथा ॥ १० ॥ शब्दशास्त्रविरुद्धं यत्तदलक्षणमुच्यते ॥ मानिनीमानदलनो यथेन्दुर्विजयत्यसौ ॥ ११ ॥ स्वसंकेतप्रकृतार्थं गम्यार्थान्तरवाचकम् ॥ यथा विभाति शैलोऽयं पुष्पितैर्वानरध्वजैः ॥ १२ ॥ यस्य नास्ति प्रसिद्धिस्तदप्रसिद्धं विदुर्यथा ॥ राजेन्द्र भवतः कीर्तिश्चतुरो हं

---

१ इष्टार्थस्य विरुद्धं यदर्थान्तरं तदाश्रयभूतमित्यर्थः। २ अत्र कमलभूतलोपकारे त्वनवरत इष्टार्थे भूतानां प्राणिनां लोपो मरणं तत्कारणं विरुद्धोऽर्थः इति प्रतीयते। ३ व्याकरण लक्षणहीनमित्यर्थः। ४ विजयतीत्यत्रविपराभ्यांजेः आत्मने पदविधायकसूत्रहीनमित्यर्थः। ५ अर्ज्जुनवृक्षैः। अत्रवानरध्वजपदं अर्ज्जुनवृक्षप्रतिपादकतया प्रयुक्तं वानरध्वजशब्दस्तु पांडवमर्ज्जुनं प्रतिपादयति कविरेवं स्वसंकेतप्रकृतार्थपदं कवितायां नप्रयुंजीत इति तात्पर्य्यम्। ६ चतुरस्समुद्रान्प्रतिहंति गच्छति हंतीति अत्र गमनार्थे अप्रसिद्धमेतत्।

ति वारिधीन् ॥ १३ ॥ शक्तमप्यर्थ माख्यातुं यन्न सर्वत्र संमतम् ॥ असं मतं तमोंभोजं[1] क्षालयंत्यंशवो रवेः ॥ १४ ॥ यद्यत्राऽनुचितं तद्धि तत्र ग्राम्यं स्मृतं यथा ॥ छादयित्वा[2] सुरान्पुष्पैः पुरो धान्यं क्षिपाम्यहम् ॥ १५ ॥ पदा त्मकत्वाद्वाक्यस्य तद्दोषास्तत्र संति हि ॥ अपदस्थास्तु[3] ये वाक्यदोषा स्तान् ब्रूमहेधुना ॥ १६ ॥ खंडितं व्य स्तसंबन्धमसंमतमपक्रमम् ॥ छन्दोरी तियतिभ्रष्टं दुष्टं वाक्यमसत्क्रियम् १७॥ वाक्यांतरं प्रवेशेन विच्छिन्नं खण्डितंम तम् ॥ यथा पातु[4] सदास्वामी यमिन्द्रः स्तौति वो जिनः॥१८॥सम्बन्धपददूरत्वे व्यस्तसंबंधमुच्यते ॥ यथाऽऽद्यः सम्पदं ज्ञाता देयात्तत्वानिवोऽर्हताम् ॥ १९ ॥

---

१ अत्राम्भोजशब्दः अंभसोजातमित्यर्थे कमलेपि संमतो न पंकेव्युत्पत्त्यादिना। २ छादयित्वेति अनुचितं रंजयित्वा इतियोज्यम्। ३ पदेष्ववर्त्तमानाः। ४ अत्रजिनः स्वामी पातु इति वाक्यमंतराले स्तौति इतिवाक्यमंतरेण विच्छिन्नम्। अर्हतामाद्यः श्रीवृषभो देवः संपदं देयादिति पदानांदूरता।

शब्दार्थौ यत्र न तुलाविधृताविव संमतौ॥ तदसंमतमित्याहुर्वाक्यंवाक्यविदोयथा ॥२०॥ मानसौकः[1] पतद्यानदेवासनविलोचनः ॥ तमोरिपुविपक्षारिप्रियां दिशतु वो जिनः॥ २१ ॥ अपक्रमं भवेद्यत्र प्रसिद्धक्रमलङ्घनम् ॥ यथा भुंक्ता कृतस्नानो गुरून्देवांश्च वंदते॥२२॥ छन्दश्शास्त्रविरुद्धं यच्छन्दोभ्रष्टं तु तद्यथा ॥ स जयंति[2] जिनपतिः पर ब्रह्ममहानिधिः ॥ २३ ॥ रीतिभ्रष्टमनिर्वाहो यत्र रीतेर्भवेद्यथा[3]। जिनो जयति सश्रीमन्निन्द्राद्यमरव-

---

१ मानसंसरस्तद्गृहं यस्यसचासौपतच्चसहंसः यानंवाहनं यस्यसः ब्रह्मासचासौ देवश्चतदासनं पद्मं तद्वद्विलोचने यस्य सस्तमोरिपुः सूर्यः तद्विपक्षोराहुः तस्यारिःकृष्णः तस्यप्रिया लक्ष्मीः तां दिशतु ददात्वित्यर्थः । २ सजयाति अत्र श्लोक लक्षणं तृतीयपदेनास्ति अतश्छन्दोभ्रष्टमित्यर्थः श्लोकेषष्ठं गुरु ज्ञेयं सर्वत्र लघु पंचमम् इतिश्लोकलक्षणम् । ३ आरब्धरीतेरभावः जिन इत्यादावसमासाद्वैदर्भीरीतिः प्रथमपादे तुद्वितीये तुसमासाद्गौडी ।

न्दितः ॥ २४ ॥ पदांतविरतिः प्रोक्तं य-
तिभ्रष्टं बुधैर्यथा ॥ नमस्तस्मै जिनस्वा-
मिने सदा नेमयेऽर्हते ॥ २५ ॥ सत्क्रि-
यापदहीनं यत्तदसत्क्रियमुच्यते ॥
यथा सरस्वतीं पुष्पैः श्रीखंडैर्घुसृणैः
स्तवैः ॥ २६ ॥ देशकालागमावस्थाद्र-
व्यादिषु विरोधिनम्॥वाक्येष्वर्थं न बध्नी
याद्विशिष्टं कारणं विना ॥ २७ ॥ प्रवेशे
चैत्रस्य स्फुटकुटजराजिस्मितादिशिप्र-
चंडे मार्त्तण्डे हिमकणसमानोष्म मह-

---

१ पदं विभक्त्यंतंपदं तन्मध्ये तन्मध्ये विरतिः विरामः अत्र जिनस्वामिने इतिपदमध्ये विरतिः क्रियते एवं कविः नकुर्वीत इति तात्पर्य्यार्थः ॥ यतिभ्रष्टमिदं । २ नेमिनाथाय ३ क्रियापदहीनं काव्यं न कुर्य्यात् यथा सरस्वती मितिवत्. अस्मिन् श्लोके क्रियानवर्त्तते स्निग्धैः सचिक्कणैः स्तवैः स्तुवी तइत्यध्याहारः । ४ स्फुटकुटजराजीति कालविरुद्धमेतत हिमकणेतिद्रव्यविरुद्धमेतत् ।

सि ॥ जलक्रीडायांतं मरुसरसि[1] बाल-
द्विपकुलं मदेनांधं विध्यंत्यसमशर-
पातैः प्रशमिनः ॥ २८ ॥ तवा ऽरिनारी-
नयनाश्रुवारिभिर्न्नरेन्द्रनिर्म्मूलितपत्रव-
ल्लिभिः॥सरांसि सत्कज्जलयुग्जलाविल-
क्षितीन्यजायंत मरुस्थलीष्वपि ॥ २९ ॥
तस्य जन्मन्यकालेऽपि तरूणां स्कंधपु-
ष्पिणाम् ॥ ससंभ्रमदृशो रूपं ददृशु र्वन
देवताः ॥ ३० ॥ अनारतमधीयानद्विजसं
निधिवर्त्तिनः ॥ यत्राऽस्फूटपदं वेदमुद्गिरं-
तिस्तनंधयाः ॥ ३१ ॥ जनिदिन एव
दृष्ट्वा मंगलदीपे निपततः शलभान् ॥
करुणामुकुलितनयनो वनतपक्षः श्रीजि-
नो जयति ॥ ३२ ॥ तदास्तये दाहमती-
त्य देहे स्त्रीणां दधुश्चन्दनबिन्दवोऽपि ॥
स्नेहाकुलस्य ज्वलनाय तोयं न तस्य

---

१ निर्ज्जलदेशेतडागासंभवत्वात् मरुसरसीति देशविरुद्धमे-
तत् मरुर्निर्ज्जलदेशः निर्ज्जलदेशतडागे जलक्रीडायान्तं कोऽर्थः
जलक्रीडासक्तं रतमिति यावत् बालद्विपकुलमितिमदेनान्धमित्य
वस्थया विरोधः प्रशमिनः संयमिनः पुरुषाः असमशरपातैः
विषमबाणपातैः बालद्विपकुलं बालहस्तिसमूहम् विध्यंति इत्या-
गमविरोधः कविरेवं वाक्यं नबध्नीयादितिभावः ।

कालस्य च दृष्टमेव ॥ ३३ ॥ इति दोष विषनिषेकैरनंकितमुज्ज्वलं सदा विबुधैः ॥ कविहृदयसागरोत्थितममृत मिवाऽऽस्वाद्यते काव्यम् ॥ ३४ ॥ इति वाग्भटालंकारे द्वितीयः परिच्छेदः॥२॥

तृतीयःपरिच्छेदः ।

अदोषावपिशब्दार्थौप्रशस्येते न यैर्विना॥तानिदानीं यथायुक्ति ब्रूमोऽभिव्यक्त ये गुणान्॥१॥औदार्य्यं १ समता२कांति ३रर्थव्यक्तिः४प्रसन्नता५॥समाधिः६श्लेष७ओजो८ऽथमाधुर्य्यं९ सुकुमारता १० ॥ २ ॥ पदार्थानामर्थचारुत्वप्रत्यायकपदान्तरैः ॥ मिलितानांयदाधानं तदौदार्य्यं स्मृतं यथा ॥३॥ गंधेभंविभ्राजितधा

---

१ इत्येवं पूर्वोक्तायें दोषास्तेएव विषंतस्य निषेकैः सिंचनैरनंकितं नचिह्नितं कविहृदयसमुद्रोत्पन्नं काव्यं विबुधैः पंडितैरमृतमिव आस्वाद्यते सदाऽतिस्वादुत्वेन गृह्यते यथा स्वादुपदार्थं अतिप्रेम्णा भुज्यते जनैरास्मिन्लोके एवमेव निर्दोषं काव्यमपि । २ अत्र गंधशब्देनेभानांलीलाशब्देनाम्बुजस्य चारुत्वं प्रतिपादितम् ।

मलक्ष्मीलीलाम्बुजच्छत्रमपास्य राज्यम् ॥ क्रीडागिरौ रैवतके तपांसि श्रीनेमिनाथोऽत्र चिरं चकार ॥ ४ ॥ बंधस्य पदवैषम्यं समता सोच्यते बुधैः ॥ यदुज्ज्वलत्वं तस्यैव सा कांतिरुदिता[3] यथा ॥ ५ ॥ कुचकलशविसारिस्फारि लावण्यधारामनुवदति यदंगासंगिनी हारवल्लिः ॥ असदृशमहिमानं तामनन्योपमेयां[4] कथय कथमहंते चेतसि व्यं जयामि[5] ॥ ६ ॥ फलैः[6] कृताहारः प्रथममपि निर्गत्यसदनादनासक्तःसौख्ये क्वचिऽदपि पुराजन्मनि कृती ॥ तपस्यन्नश्रांतं ननु वनभुवि श्रीफलदलैरखंडैः खंडेन्दोश्चिरमकृतपादार्चनमसौ ॥ ७ ॥ पदमेयत्वमर्थस्य ह्यर्थव्यक्तिः स्मृता यथा ॥ त्वत्सैन्यरजसा लुप्ते सूर्य्ये रा

जलक्रीडास्वैव । २ प्रकटीकरोमि । ३ कांतेरुदाहरणमाह । वस्थया विरोधः । विषमबाणपातैः बालं । ५ बिल्वपत्रैः । ६ यत्रोक्तोप्यर्थोबलात्कर्थं गमाविरोधः कविरेवं वक्ति ।

श्रिरभूदिवा ॥ ८ ॥ झटित्यर्थार्थकत्वं य-
त्प्रसत्तिः सोऽच्यते यथा ॥ कल्पद्रुमइवा
ऽऽभाति वांछितार्थप्रदो गुरुः ॥ ९ ॥
स समाधिर्यदन्यस्य गुणोऽन्यत्र निवे
श्यते ॥ यथा श्रुतिररिस्त्रीणां राज्ञःपल्ल
वितं यशः ॥ १० ॥ श्लेषो यत्र पदानि
स्युःस्यूतानीव परस्परम् ॥ ओजस्स-
मासभूयस्त्वं तद्द्वयोष्वेव सुन्दरम् ॥ ११ ॥
उत्तो यस्योऽद्गीतं सह सहचरीभासो
क्तिर्मुहुः श्रुत्वा हेलोद्ग[illegible] ६ तिश-
जबलं ॥ दरोद्गच्छद्भा[illegible] क्तिः १९ समा-
त्पुलकिताश्चमत्कारोद्रेकं [illegible] १७ र्यथासं-
ण स्तेऽपि दधिरे ॥ १२ ॥ समरा[illegible] क्तिः २४॥
हरिनरेशकरिनिकरशिरः सरसरि[illegible]-
रपरिचयेनेवारुणितकरतलो देवइति
गद्यम् ॥ १३ ॥ सरसार्थपदत्वं यत्त
न्माधुर्य्य मिहोऽच्यते ॥ अनिष्ठुराक्षरत्वं

---

१ लताधर्मः पल्लवनं यशसिनिवेश्यते । २ गंधेरोजोगुणमु-
दाहरति ।

यत्त त्सौकुमार्य्यमिदं यथा ॥ १४ ॥ फणि
मणिकिरणालीस्यूतचञ्चन्निचोलः कु
चकलशनिधानस्येव रक्षाधिकारी ॥ उ
रसि विशदहारस्फारतामुज्जिहानः कि
मिति करसरोजे कुंडली कुंडलिन्याः
॥ १५ ॥ प्रतापदीपांजनराजिरेव देव त्व
दीयः करवाल एषः ॥ नोचेदनेन द्विषतां
जयांसि श्यामायमानानि कथं कृतज्ञ्यं
पि निर्गत्यसामेव दाम रम्यम् ॥ देव
चिऽदपि पुंस कंठपीठे करोत्यलंकारत
श्रांतं नत्वम् ॥ १७ ॥ ❀ ॥ इति वाग्भ-
खंडेऽलंकारे तृतीयः परिच्छेदः ॥ ३ ॥

---

१ माधुर्य्यमुदाहरति पद्मावत्याः देव्याः करसरोजे कुंड-
ली सर्पः किमिति किमर्थमित्यर्थः किम्भूतः फणइत्यादि त-
स्यूतः प्रोतः चंचत्प्रधानं निचोलः कंचुकोयेन हृदि निर्मल
हारवद्विस्तीर्णतां प्राप्तवान् भवेत् तदा तादृशनिधानस्यरक्षा-
धिकारीच स्यादत्र पदानामर्थसरसत्वान्माधुर्य्यम् १५ ।
२ अविरोधात्सौकुमार्य्यमुदाहरति ।

दोषैर्मुक्तं [1]गुणैर्युक्तमपि येनोज्झितंवचः॥
स्त्रीरूपमिव नो भाति तं ब्रुवे लंक्रियो
ज्झयम्॥ १ ॥ चित्रं१वक्रोक्त्य२नुप्रासौ ३
यमकं ४ ध्वन्यलंक्रिया॥ [3]अर्थालंकृतयो
जाति १ रुपमा २ रूपकं ३ तथा ॥ २ ॥
प्रतिवस्तूपमा ४ भ्रांतिमान[2]ऽऽक्षेपौ ६
ऽथ संशयः ७॥ दृष्टांत ८ व्यतिरेकौ ९
वाऽपह्नुति १० स्तुल्य योगिता ११ ॥३॥
उत्प्रेक्षा १२ ऽर्थांतरन्यासः १३ समासो
क्ति १४ र्विभावना १५॥दीका १६ ऽतिश-
यौ १७ हेतुः १८ पर्य्यायोक्तिः १९ समा-
हितम् २० ॥ ४॥ परिवृत्ति २१ र्यथासं-
ख्यं २२ विषमः २३ ससंहोक्तिकः २४॥
विरोधो २५ वसरः २६ सार २७ स्संश्लेष-
श्च २८ समुच्चयः २९ ॥ ५॥ अप्रस्तुत-
प्रशंसा ३० स्यादेकावल्य ३१ ऽनुमा
ऽपि ३२ च ॥ परिसंख्या ३३ तथा प्रश्नो-

---

१ अलंकारादिभिः औदार्य्यादिभिः। २ चतस्रश्चित्राद यश्शब्दालंक्रियाः। ३ जात्यादयोऽर्थाऽलंकाराः॥

त्तरं ३४ संकर ३५ एव च ॥ ६ ॥ यंत्रां ग-
संधितद्रूपैरक्षरैर्वस्तुकल्पना ॥ सत्यां
प्रसत्तौ तच्चित्रं तच्चित्रं चित्रकृच्चयत्॥७॥
जनस्य नयनस्थानध्वान्तमेनश्छिन
त्तिनः ॥ पुनः पुनर्जिनः पीनज्ञानध्यान
घनस्स नः ॥ ८ ॥ षोडशदलपद्मं चित्रं
गोमूत्रिका० गणनरगणवरकरतरचरण
परपदशरणगजनपथकथक ॥ अमदन
गतमदगजकरयुगल शममय जय
भयघनवनदहन ॥ ९ ॥ एकस्वर चि-
त्रम् ॥ मूलं स्थितिमधः कुर्वन् पौत्रैर्जुष्टो
गताक्षरैः ॥ विटः सेव्यः कुलीनस्य ति-
ष्ठतः पथि कस्य च॥१०॥विटपदादिका-
रमात्राच्युतकम् ॥ धर्माधर्मविदः साधु
पक्षपातसमुद्यताः ॥ गुरूणां वंचेने निष्ठा
नरके यांति दुःखिताः॥११॥वंचनपदाद्धिं

---

१ यत्राऽर्थालंकारे अंगैरवयवैः संधिभिः संधानैश्चतद्रूपै रक्षरैः यत्चित्रकारि तदपि चित्रं कृत्वा वस्तुकल्पना क्रियते। २ अवस्थां विनाशयन् मूलस्थितिमधः कुर्वन् पाताले कुर्वन्वटः गताक्षरैः मूर्खैः पौत्रैर्वाजुष्टः सहितः ।

दुच्युतकमस्मिन्नज्ञेयं ॥ कंकाकुकंककके कांककेकिकोकैककुः ककः॥अकुकौकः काककाक्षत्रऽक्काकुकुककांककुः १२कुर्वन् दिवाकराश्लेषं दधच्चरणडम्बरम्॥ देवयौष्माकसेनायाः करेणुः प्रसरत्यसौ १३अत्रकरेणुपदात्ककारस्वरूपवर्णच्युतकम्॥प्रस्तुतादपरं वाच्यमुपादायोऽत्तर-प्रदः॥भंगश्लेषमुखेनाऽऽह यत्र वक्रोक्ति

---

१ समुद्रवर्णनमनेन श्लोकेन क्रियते–कंसुखंकाकुध्वनौ केन कामेन सुखेन वा कोकवा ध्वनिविशेषायेषांते कंसुखं यथास्या देवं कायांतिकंकाः केकांका स्तादृशाः केकिनश्चते कोकाश्चक्रवा का स्तैरेका अद्वितीयाकुर्भूमिः यस्यसः तथोक्तः केनजलेन उ-पलक्षितः कोवायुर्यत्र यद्वाकेन वायुना प्रेरितं कंजलं यस्यसः ककः समुद्रोवर्त्तते इतिशेषः यद्वा कमेव जलमेवकः आत्माय-स्यसः ककः समुद्र एव कुःकुत्सितः अकुवः शोभनाः कौकसो जलवासिनस्तेचते काकाश्चतेषां समूहः काक्कं स्वार्थेकः प्रत्य-यः तस्य अक्क अंबामाता यत्र समुद्रे समुद्र एव पालनधर्मत्वान्मा-ता यऋचो वेदवाक्यानि तेपांकाकवो वक्रोक्तयः तासांकुको गृ-हीता कुकति जल्पतिवा आदत्तेवा सन्नासौ को ब्रह्मा सः अंके उत्संगेयस्यसः ऋक्षा कुकुकांकः विष्णुः तस्यकुः स्थानं यत्रस समुद्रः कुकवृक शब्दे इति धातुः दिवाकरेणसह संदर श्लेषं सूर्यश्लेषं वा पादंडबंररणंडबंरंवा॰

रेवसा ॥ १४ ॥ भंगोदाहरणम् ॥ नाथ मयूरो नृत्यति तुरगाननवक्षसः कुतो नृत्यम् ॥ ननु कथयामि कलापिनामिह सुखकलापी प्रियेकोस्ति ॥ १५ ॥ श्लेषोदाहरणम् ॥ भर्तुःपार्वति नाम कीर्तय न चेत्त्वां ताडयिष्याम्यहं क्रीडाञ्जेन शिवेति सत्यमनघे किं ते सृगालः पतिः ॥ नो स्थाणुः किंशुकीलको नहिपशुस्वामी नु गोमा गवां दोलाखेलनकर्मणीति विजया गौर्य्या गिरः पांतुवः ॥ १६ ॥ तुल्यश्रुत्यक्षरावृत्तिरनुप्रासः स्फुरद्गुणः अतत्पदः स्याच्छेकानांलाटानां तत्पदश्रसः ॥ १७ ॥ अलंकलंकशृंगारकरप्रसरहेलया ॥ चन्द्र चंडीशनिर्माल्यमसि

---

१ नृत्यंतं केकिनं वीक्ष्य पतिं काचिदाह—स्यात्किन्नरः किम्पुरुषस्तुरंगवदनो मयुरित्यमरः २ कलापः पिच्छभारः अस्यास्तीति अत्र कं सुखं लपितुं शीलं यस्येति भंगः भंगेन शब्दखंडेनोभयवाचिना शब्देन । ३ औदार्य्यादि गुणाहि अनुप्रासेन दीयंते । ४ पादेनलाटानुप्रासमुदाहरति । ५ छेकानुप्रासमुदाहरति विरहिणीवचनं अलमिति ।

न स्पर्शमर्हसि ॥ १८ ॥ रणे रणविदो हत्वा दानवान् दानवद्विषा ॥नीतिनष्टेन भूपाल भूरियं भू स्त्वया कृता ॥ १९ ॥ त्वं प्रिया चेच्चकोराक्षि स्वर्गलोकसुखेन किम्॥त्वं प्रिया यदि न स्या मे स्वर्गलो कसुखेन किम् ॥२०॥ एकत्र पात्रे स्वक लत्रवत्कं नेत्रामृतं बिंबितमीक्षमाणः पश्चात्पपौ सीधुरसं पुरस्तान्ममाद कश्चि द्यदुभूमिपालः ॥ २१ ॥ स्यात्पा-

दपदवर्णनामावृत्तिः संयुता युता॥यमकं भिन्नवाच्यानामादिमध्यान्तगोचरा ॥ २२ ॥ दयां चक्रे दयांचक्रे सतां

---

१ अभिन्नपदछेकानुप्रासः भिन्नपदो लाटानुप्रास इति सर्वथा तुल्यन्याया वृत्तिरुक्ता संप्रति किंचिद्भेदैरपि वर्णानां तुल्यश्रुतत्वादनुप्रास इति दर्शयति एकत्रेति । २ इत्यनेन लाटानुप्रासः कलत्रदर्शनात् एव प्रागुन्मादं गतो मद्यं पश्चात्पपौ । ३ आवृतिर्द्विधा एका मिलिता संलग्ना असंलग्ना एतावद्भेदाः षड्विधमपित्रिधा एकं पादाद्यक्षरविषयं द्वितीयंपादवर्णमध्यविषयं तृतीयं पादप्रांतवर्णविषयं तेनाष्टाविधाभिन्नार्थानां वृत्तस्य चतुर्थांशः पादः विभक्त्यंतं पदं वर्णाक्षराणामावृत्तिरभ्यासः। ४ व्यावर्त्तितः।

तस्माद्भवान्वितं ॥२३॥ चतुरक्षरच्छन्दः यशस्ते समुद्रान्सहारोरगारेः सदाऽऽ रोरगारेः समानांगकांतेः ॥ द्विषा मुद्धतानां निहंसि त्वमिन्द्रः मुदं भोधरा-णामु दंभोधराणाम् ॥२४॥ षडक्षरद्वयम् विभातिरामा परमारणस्य विभाति रामा परमा रणस्य॥ [1]सदैवतेजोर्ज्जित रा-जमान सदै वतेजोर्ज्जितं राजमान ॥२५॥ सारं गवयसान्निध्य राजि काननमग्रतः [3]सारंगवयसान्निध्यदारुणं शिखरे गिरेः ॥ २६ ॥ आसन्नदेवा नरराजराजिरुच्चै स्तटानामियमत्र नाद्रौ ॥क्रीडाकृतोयत्र दिगन्तनागा आसन्नदेवानरराजराजि

---

१ सदैवेन सभाग्येन तेजसा राजसुमानः पूजायस्यसः । २ अजोविष्णुस्तद्वदूर्ज्जितेन बलेन शोभमानं । ३ गिरिणारस्य शृंगेकाननमग्रतो भातीत्यर्थः ।

॥ २७॥ अमरनगरस्मेराक्षीणां प्रपंच यति स्फुरत्सुरतरुचये कुर्वाणानां बलक्ष-मरंहसम् ॥ इह सहसुरैरायांतीनां नरे शनगेन्वहं सुरतरुचये कुर्वाणानां वलक्ष-मरंहसम् ॥ २८ ॥ रंभारामा कुरवक कमला रंभा रामाकुरवककमला रंभारा-मा कुरवक कमला रंभारामाकुरव ककमला ॥ २९ ॥ हारीतहारी तत मेषधत्ते शेवाल शेवाल सहंसमंभः॥जंबा-लंजं वालमलं दधानं मंदारमन्दारववा युरद्रिः॥३० ॥नेमिर्विशालनयनो नयनो दितश्रीरभ्रांतबुद्धिविभवो विभवोऽथ

---

१ इहनगेबाणवृक्षाणां कुर्भूमिरमरस्त्रीणां रंहसंवेगं प्रपंचयति स्फुरंतः सुरतरूणां चयाः यत्र कीदृशीनां अरंशीघ्रं वलक्षं धव-लं हसंहास्यं कुर्वाणानां सुबोधमन्यत् । २ रंभाणां कदली नामारामोयस्यांसाकुर्भूमिः हे अवक रक्षक शोभत इति शेषः कमलानां आरंभ उत्पत्तिर्यस्यांसा रामामनोहरा नकुत्सितः र-वकः शब्दोयेषां ते तादृशा कमला हरिणायस्यां सारंभारामा अकुः अकुत्सिता पुनः अवकंबक पक्षिवर्ज्जितं कंपानीयं मलते धारयति तथा कुरवकैः कमला शोभायस्यां । ३ जलं । ४ पंकजं । ५ नवीनं । ६ मन्दाराणां वृक्षविशेषाणां मंदारवः वायुर्यत्रस अद्रिः ।

भूयः॥प्राप्तो महाजनगरान्नगराजि तत्रसू
तेन चारुजगदेजगदेकनाथः ॥ ३१ ॥ यंदु
पान्तिकेषु सरलाः सरला यदनूच्चलंति
हरिणा हरिणाः ॥ तदिदं विभाति क
मलं कमलं पदमेत्य यत्र परमापरमा
॥ ३२ ॥ कांतारभूभौ पिककामिनीनां
कां तारवाचं क्षमते स्म सोढुम्॥कांतारते
शेऽध्वनि वर्तमाने कान्तारविन्दस्य म-
धोः प्रवेशे ॥ ३३ ॥ चकार साहसं युद्धेधू-
तोल्लासाहसंचया॥दैन्यंत्वांसाहसंप्राप्ता
द्विषां चोत्साहसंततिः ॥ ३४ ॥ गिरांश्रू-
यते कोकिला कोविदाऽरं यतस्तद्वनं
विस्फुरत्को विदारम् ॥ मुनीनां वसत्यत्र
लोकोविदारं न च व्याधचक्रं कृतौकी
विदारम् ॥ ३५ ॥ सिंधुरोचितसाग्रश

---

१ यस्यांभसः समीपेषु । २ अवक्राः । ३ मधोर्वसंतस्य प्रवेशेपिककामिनीनां कांतारवाचं सोढुं क्षमतेस्म. अपि तुनकाम पिरतेशेपथि वर्त्तमाने सति । ४ हास्यं । ५ विकसंतः कोविदाराः कचनारवृक्षविशेषास्तत्र । ६ निःकलत्रं यथास्यात् । ७ पक्षिकृतनिवासकम् । ८ गजोचितासु लतासु प्रधानप्रभूता या शल्लकी तद्युक्ताया सिंधुर्नदी तयारोचितं शोभितं ।

ल्लकीसिंधुरोचित मुपेत्य किन्नरैः॥ कंद राजित मदस्तटंगिरेः कंदराजितगृहश्रि गीयते॥ ३६॥ वसन् सरोगोऽत्र जनो न कश्चित्परं सरोगो यदि राजहंसः॥ गी तंकलं को न करोति सिद्धः शैले कलंको कितकाननेऽस्मिन्॥ ३७॥ जहुर्वसंते सरसीर्नवारणा बभुः पिकानां मधुरा नवा रणाः॥ रसं न का मोहनकोवि दार कं विलोकयंतीवकुलान्विदारकम्॥३८॥ वरणा प्रसूननिकरा वरणा मलिनां वहंति पटलीमलिनां॥तरवःसदात्र शिखिजातर वः सरसश्च भाति निकटे सरसः ३९ यथा यथा द्विजिह्वस्य विभवः स्यान्महत्तमः॥तथा तथास्य जायेत स्पर्द्धयेव म हत्तमः॥४०॥दास्यति दास्यति कोपादा

१ कन्दैःराजितं शोभमानम्। २ रणाः शब्दाः रणशब्द इति धातुः। ३ कासुरतपंडिता स्त्रीकिंरसं न आर अपितु सर्वां सर्वं रसं प्रापेत्यर्थः विदारकं निरपत्यं यथास्यात्तथा तस्या एव संभोगक्षमत्वात्। ४ वृक्षविशेषाः। ५ पुष्पसमूहा च्छादकाः। ६ दुर्जनस्य। ७ धनं। ८ उत्कृष्टतमं। ९ महत्तमः महदज्ञानम्।

स्यति सति कर्करांस्तुते शापम्॥भवति भवतिह्यनर्थो भवति मितस्तेन बटुक त्वम् ॥ ४१ ॥ कुलं[1] तिमिभयादत्र करेणूनां नदीव्यति॥ न दीव्यति करेणूनां प्राणिनां गणनाऽयिका ॥ ४२ ॥ गंगां बुधवलांगाभोमुमुक्षुध्यानगोचरः॥पापा त्तिहरणार्यास्तु समज्ञानो जिनः सताम् ॥ ४३ ॥ जगदात्मकीर्त्तिशुभ्रंजनयन्नु द्दामधामदोः[2]परिघः॥ जयति प्रताप[3]पूषा जयसिंहः क्ष्माभृ[4]दधिनाथः॥ ४४ ॥ मा-माकारयतेरामासासा मुदित मानसा ॥ याया मदारुण[5]छाया नानाँ[6]हेलामया नाना ॥ ४५ ॥ स्वभावोक्तिः पदार्थस्य

---

१ करेणूनां कुलं समूहः अत्रनदीव्याति करे आस्थाने तिमिः मत्स्यश्रेष्ठः तस्यभयान्नदीव्याति न क्रीडति अणूनांक्षुद्राणां जंतूनां का गणना नकापीत्यर्थः। २ उत्कृष्टतेजा दो रेवअर्गलायस्यसः। ३ प्रतापेन सूर्यः। ४ राजाधिराज इत्यर्थः। ५ मदेन मद्यपानोत्थेनापि मानेन अरुणा रक्ता छाया कांतिर्यस्याःसा मदारुणच्छाया। ६ नानाप्रकारविलासाश्रयं आननं यस्याःसा।

सक्रियस्या[1] क्रियस्य[2]च-॥ जाति[3]विशेषतो रम्या हीने त्रस्तेर्भकादिषु ॥ ४६ बर्हावलीबहलकांचिरुचो विचित्रभूर्यत्वचारु चितचारुदुकूललीलाः ॥ गुंजाफलग्रथित हारलताः सहेलंखेलंति खेलगतयोऽत्रवने शबर्य्यः॥४७ ॥ आरक्तणेत्तसंराणिभीसण[5] वयणुक्करो कुरंगछि उल्लसितअवीसभु अवणविनिवेशो दश मुहो एसो ॥ ४८ ॥ उपमानेन सादृश्य मुपमेयस्य यत्र सा प्रत्यया१व्यय२तुल्यार्थ३समासै रुपमा मता ॥ ४९ ॥ गत्या विभ्रममंदया प्रति पदं या राजहंसायते यस्याः पूर्णमृगांक मंडलमिव श्रीमत्सदैवाननं ॥ यस्याश्चा नुकरोति नेत्रयुगलं नीलोत्पलानि श्रिया तांकुन्दाग्रदतीं त्यजन् जिन[6]पती राजा-

---

२ सक्रियस्यमनुष्यादेः । २ अक्रियस्यपर्वतादेः । ३ जातिः स्वभाववर्णनं । ४ शवर्य्यः भिल्लस्त्रियः । ५ आरक्तनेत्रश्रीणिभीषणवदनोत्करः उल्लसितविंशतिभुजवननिकरः एषः दशमुखः हे कुरंगाक्षिसीते । ६ श्रीनेमिः

मतिं पातु वः ॥ ५० ॥ चन्द्रवद्वदनं[1] तस्यानेत्रे नीलोत्पलेइव॥यस्या बिंबं हसत्योष्ठः पुष्पधन्वधनुर्भ्रुवौ ॥ ५१ ॥ मअ भणीय माणासस्स विणिच्चंदोसा अरस्स ससिंणुच्चतुअ विरहे तीएमुहं संकुंडि अंसुभअ कुमुहंच ॥ ५२ ॥ तंणमह वीअराअं जिणंद मुहत्तिअदिठ अरकसाअं॥ जस्स मणं व सरीरं वसुपसन्नं ॥ ५३ ॥ ये देव भवतः पादौ भवत्पादाविवाश्रिताः ॥ तेलभंतेद्भुतांभाव्यां श्रियं त इवशाश्वतीम्॥५४।आलोकनं च वचनंच निगूहनं च यासां स्मरन्नमृतवत्सरसंकृशस्त्वम्।तासां किमंग पिशिता स्रपुरीषपात्रं गात्रं विचिंत्य सुदृशांन निराकुलोसि ॥ ५५ ॥ कलेव चंद्रस्य कलंकमुक्ता मुक्तावलीवोरुगुणप्रपन्ना ॥ जगत्त्रयस्याभिमतं ददाना जैनेश्वरी

---

१ पुनःक्रमशश्चतस्रः शशिन इव नवविरहे कुमुदमिवतस्याः मुखं संकुचितं ।

कल्पलतेवमूर्तिः ॥ ५६ ॥ विभिन्नलिंगवचनां नातिहीनाधिकां च ताम् ॥ निबध्नंतिबुधाः क्वापि लिंगभेदं तु मेनिरे॥ ५७ ॥ हिममिव कीर्त्तिर्धवला चन्द्रकलेवातिनिर्मला वाचः ॥ध्वांक्षस्येवच दाक्ष्यंनभइव वक्षश्चते विपुलम् ॥ ५८ ॥ शुनीयंगृहदेवीव प्रत्यक्षा प्रतिभासते ॥ खद्योत इवसर्वत्र प्रतापश्च विराजते ॥ ५९ ॥ सफेनपिंडः प्रौढोर्म्मिरब्धिः शाङ्गीव शंखभृत् ॥ श्यौतन्मदः करी वर्षन्विद्युत्त्वानिव वारिदः ॥ ६० ॥ मुखं चन्द्रमिवालोक्यदेवाह्लादकरं तव ॥ कुमुदंतिमुदाक्षीणि क्षीणमध्यात्मसंपदाम् ॥ ६१ ॥ निजजीविते शकरजाग्रकृतक्षतपंक्तयः शुशुभिरे सुरते ॥कुपितस्मरप्रहितबाणगणव्रणजर्जरा इवसरोजदृशः॥६२॥ दोः कंदलीं काचिद वश्यनाथा सिषेच नेत्रक्षरदश्रुपूरैः।हस्ता

१ कुमुदामिवाचरंति फुल्लंतीत्यर्थः। २ कृशकट्या शरीरे शोभायासांताः तासाम्। ३ अत्र रूपके दोषः पुंस्त्वेकदल्या स्त्रीत्वेपि न दोषः समासेन विरोधनात्।

ग्रविन्यस्तकपोलदेशा मिथो मिलत्कुंड लकङ्कणश्रीः ॥ ६३ ॥ बहुंवीरे प्यसावेको यदुवंशेद्भुतोऽभवत् ॥ किं केतकीदलानि स्युः सुरभीण्यखिलान्यपि ॥६४॥ रूपकं यत्र साधर्म्यादर्थयो रभिदाभवेत् समस्तं वासमस्तं वा खंडंवाखंडमेवच॥६५॥ कीर्णांधकारालकशा लमाना निबद्धता-रास्थिमणिः कुतोपि ॥ निशापिशाची व्यचरद्धानामहान्त्युल्लूकध्वनिफेत्कृतानि॥६६॥संसार एष कूपःसलिलानि विपत्तिदुःखजन्मानि ॥ हरिधर्मएव रज्जु स्तस्मादुद्धरति निर्मग्नान्।६७।अधरं मुखेन नयनेन रुचिं सुरभित्वमाब्ज मिव नासि-

---

१ अत्र वस्तूपमाया वंशस्य केतकी वीराणामसुरभि दलितानि श्रीनेमेः सुरभिदलान्युपमानं तत्र लिंगभेदः समासेन तिरोहित इति न दोषः । २ उपमानोपमेययोरभिदा ऐक्यारोपणं तच्चतुःप्रकारं । ३ व्याप्ततमोरूपकुंतलशोभमाना इत्यर्थः । ४ अत्र निशयोपमेयेन सह पिशाच्या उपमानस्य समासकरणात् समस्तं पिशाचीधर्मकथनाच्च संपूर्णम् । ५ इदं समस्तं संपूर्णरूपकं । ६ अधर मित्यत्र न कश्चिद्धर्यः प्रतियादितः इति खंडनसमस्तमसंपूर्णं रूपकम् ।

कया ॥ वरवर्णिनीवदचन्द्रमसस्तरुणा
रसेन[1] युगपन्निपपुः॥६८॥ ज्योत्स्नया धव
लींकुर्वन्नुर्वींसकुलपर्वताम्॥ निशा[3]विलास
कमलमुदेति स्मनिशाकरः॥६९॥अनुपा
त्ताविवादीनां वस्तुनः प्रतिवस्तुना यत्रप्र
तीयते साम्यं प्रतिवस्तूपमा तु सा॥७०॥
बहुवीरेऽप्यऽसावेकोयदु[4]वंशेऽद्भुतोभवत्
किं केतक्यां दलानि स्युः सुरभीण्यखि-
लान्यपि ॥ ७१ ॥ वस्तुन्यन्यत्र कुत्रापि
तत्तुल्यस्यान्य वस्तुनः॥निश्चयोयत्र जा
येत भ्रांतिमान् स स्मृतो यथा ॥ ७२ ॥
हेम[5]कमलत्तिवणेणअणेणीलुप्पलंत्तिपस
अंक्षि[6] कुसुमंतितुज्झहसिएणिच इडभ
मराणंणिछेणी ॥ ७३ ॥ उक्तिर्यत्रप्रती
तिर्वा प्रतिषेधस्य जायते ॥ आचक्षते

---

१ पुरुषाः । २ अनुरागेण । ३ इदं समस्तं खंडं रूपकम् । ४ अत्र यदुवंशादेर्वस्तुनः केतक्यादिभिः प्रतिवस्तुभिः सहसादृश्यप्रतीतिः । ५ अत्र हेम कमलादिभ्रमो वदनादौ । ६ प्रसृताक्षि ।

तमाक्षे[1]पमलंकारं बुधा यथा ॥ ७४ ॥ इन्द्रेण किं स यदि कर्णनरेन्द्रसूनुरैराव तेन किं महो यदि तद्विपेन्द्रः॥दंभोलिना[2]ऽप्यलं[3]मलंयदि तत्प्रतापः स्वर्गोप्ययं ननु मुधा यदि तत्पुरी सा ॥ ७५ ॥ यस्याऽस्ति नरकक्रोडनिवासरसिकं मनः॥ सोऽस्तुहिंसानृतस्तेयतत्परस्सुतरांजनः ॥ ७६ ॥ इच्छ[4]न्ति येनकिर्त्तिकुणत्तिकरुणं खवणंप्यिजेणेय ॥ तेपणधनदघणरादेत्तिधणं मरण समएवि ॥ ७७ ॥ इदमेतदिदं चेति सम्यग्बुद्धेर्हि संशयः॥हेतुभिर्निश्चये सोपि निश्चयांतः स्मृतो यथा ॥ ७८ ॥ किंकेशपाशः प्रतिपक्षलक्ष्म्याःकिंवा प्रतापानलधूम एषः॥दृष्ट्वा

---

१ अत्र निषेधस्योक्तिः शब्देन प्रतिपादनं प्रतीतिर्वा सामर्थ्ये न स आक्षेपः। २ दंभोलिरशनिर्द्वयोरित्यमरः। ३ अत्र-किंचालंशब्दो निषेधे। ४ येनराः पुरुषाः कीर्तिंनेच्छंतियेचक्षणमापि करुणां न कुर्वंति तेचधनदवन्मरणसमयेविधनंददति अपिनेत्यर्थः अत्रोदाहरणद्वयेऽर्थसामर्थ्यात्काकाा निषेधः प्रतीयते नशब्दः।

भवत्पाणिगतं कृपाणमेवं कवीनां मतयः स्फुरंति॥ ७९॥ इन्द्रःस एषं यदि किंन सहस्रमक्ष्णां लक्ष्मीपतिर्यदि कथं न चतुर्भुजो सौ॥ आस्पन्दनध्वजधृतोद्धरताम्रचूडः श्रीकर्णदेवनृपसूनुरयं रणाग्रे८० अन्वयज्ञापनं यत्रक्रियया स्वतदर्थयोः तं दृष्टांतमिति प्राहुरलंकारं मनीषिणः॥ ८१॥ पतितानां संसर्गं त्यजंति दूरे णनिर्म्मला गुणिनः॥इति कथयन् जरतीनां हारः परिहरति कुचयुगलम्॥ ८२॥ केनचिद्यत्र धर्मेण द्वयोः संसिद्धसाम्ययोः॥ भवत्ये कतराधिक्यं व्यतिरेकस्स उच्यते॥ ८३॥ अस्त्वस्तु पौरुषगुणाज्जयसिंहदेवपृथ्वीपतेर्मृगपतेश्च समानभावः॥किंत्वेकंतः प्रतिभटा समरंविहाय सद्योविशंति वनसिंहमशं

---

१ अत्रकोटिद्वयावगाहित्वात् संशयः। रक्षिसहस्रादिभिः शब्दैर्निश्चयेनिश्चयांतः। प्रवेशेनान्यसिंहाज्जयसिंहस्याधिक्यम्।

२ अत्र हेतुभि-

३ अत्र शत्रूणांवन

कमानाः ॥ ८४ ॥ नेदमेतदिदंचैतदित्यपह्नवपूर्वकम् ॥उच्यते यत्र सादृश्याद्ऽपन्हुतिरियंयथा॥८५[1] नैतन्निशायांशितिसूचिभेद्यमंधीकृतालोकन मंधकारम् ॥ निशागमप्रस्थितपंचबाणसेनासमुत्थापित एष रेणुः ॥८६ ॥ उपमेयंसमीकर्तुमुपमानेन योज्यते॥तुल्यैककालक्रियया-यत्र सा तुल्ययोगिता ॥ ८७ ॥ तमसालुप्यमानानां लोकेऽस्मिन् साधुवर्मनाम् ॥ प्रकाशनाय पटुता भानोस्तव च दृश्यते॥८८॥कल्पना काचिदौचित्याद्यत्रान्यस्य सतोऽन्यथा ॥ द्योतितेवादिभिःशब्दैरुत्प्रेक्षा सा स्मृतायथा ॥८९॥नभस्तले किंचिदिव प्रविष्टाश्चकाशिरेचन्द्ररुचिप्ररोहाः ॥ जगद्विलित्वा हसतःप्रमोदाद्दन्ता इव ध्वांतनिशाचरस्य॥९०उक्तसिद्ध्यर्थमन्यार्थन्यासोऽयाम्तिपुरस्सरः ॥ कथ्यतेऽर्थान्तरन्यासः श्लिष्टोश्लिष्ट

---

१ एतादिदंनहि निश्चितमेतादिदंसेयमपन्हुतिः ।

श्वसद्विधा ॥ ९१ ॥ शोणत्वमक्ष्णामसि
ताब्जभासां गिरां प्रचारस्त्वऽपरप्रका
शः॥बभूव पानान्मधुनो वधूनामचिन्तनी
योहिसुरानुभावः॥९२॥शुण्डादण्डैःकंपि
ताः कुञ्जराणां पुष्पोत्सर्गंपादपाश्चारुच
क्रुः॥स्तब्धाकाराः किं प्रयच्छंतिकिंचि
त्क्रांतायावन्नैव तैर्वीतशंकम्॥९३॥[1]उच्य
तेवक्तुमिष्टस्य प्रतीतजननक्षमम्॥सधर्म
यत्र वस्त्वन्यत्समासोक्तिरियंयथा९४॥
मधुकर मा कुरु शोकं विचर करीरद्रु
मस्य कुसुमेषु ॥ घनतुहिनपातदलिता
कथं नु सा मालती मिलति ॥९५॥ चिंत-
यति न चूतलतां याति न जातीं न केतकीं
क्रमते ॥ कमललतालग्नमना मधुपयु वा
केवलं कणति ॥९६॥ विना कारणसद्भावं
यत्र कार्य्यस्य दर्शनम् ॥ नैसर्गिकगुणो
त्कर्षभावना स्याद्भिभावना ॥ ९७ ॥ अन
ध्ययनविद्वांसो निर्द्रव्यपरमेश्वराः॥अन
लंकारसुभगाः पांतु युष्मान् जिनेश्वराः

१ उचसमवाये ।

९८॥आदिमध्यान्तवर्त्यैकपदार्थैनार्थसं-
गतिः॥वाक्यस्य यत्र जायेत तदुक्तं दीप
कं यथा ॥ ९९ ॥ जगुस्तव दिवि स्वामि-
न् गंधर्वाःपावनंयशः ॥ किन्नरा श्च कुला
द्रीणां कन्दरेषु मुहुर्मुहुः ॥ १०० ॥ विराजं
ति तमिस्राणि द्योतंते दिवि तारकाः॥वि-
भांति कुमुदश्रेण्यः शोभंते निशि दीप-
काः ॥ १०१ ॥ वस्तुनो वक्तुमुत्कर्ष
मसंभाव्यं यदुच्यते ॥वदंत्यतिशयाख्यं
तमलंकारं बुधायथा ॥ २ ॥ त्वद्वारितारि
तरुणीश्वसितानिलेन संमूर्च्छितोर्मिषु
महोदधिषु क्षितीषु ॥ अन्तर्लुठद्गिरिपर
स्परशृंगसङ्घोरारवैर्मुररिपोरपयातिनि
द्रा ॥ ३ ॥ एकदंडानि सप्तस्युर्यदिच्छ
त्राणि पर्वते॥तदोपमीयते पार्श्वमूर्ध्नि सप्त
फणः फणी ॥ ४ ॥ यत्रोत्पादयतः कंचिऽ
दर्थंकर्तुः प्रकाशते ॥ तद्योग्यतायुक्ति
रसौ हेतुरुक्तो बुधैर्यथा ॥ ५ ॥ पाणः
समउन्मतातंताविरहेणकुण इणाहस्स

कम्बत्तरच्चोलि अरमहुरसरंवाणुलि आ-
गीअं ॥ ५ ॥ विससोअरोमि अंकोअअ
न्नआशाए आगअपंवणे॥आजएला सो-
सिहरीपहिअम्मरितित्तेतिणि ॥६॥ अत-
त्परतयायत्र जल्प्यमानेन वस्तुना॥विव
क्षेतं प्रतीयेत पर्य्यायोक्तिरियं यथा ॥
॥ ७ ॥ त्वत्सैन्यवाहनिवहस्य महाहवेषु
द्वेषः प्रभोरिपुपुरंध्रिजनस्यचाऽऽसीत् ॥
एकः खुरैर्बहलरेणुततिं चकार तां संज-
हार पुनरश्रुजलैर्यदन्यः ॥ ८ ॥ कारणां-
तरसंपत्तिर्हेवादारंभणेवहि॥यत्रकार्यस्य
जायेत तज्जायेत समाहितम् ॥ ९ ॥ मन-
स्विनी वल्लभवेश्मगंतुमुत्कंठिता यावद-
भून्निशायां ॥ तावन्नवांभोधरधीरनादप्र-
बोधितःसौधशिखी चुकूज॥१०।परिवर्त्त-
नमर्थेन सदृशासदृशेन वा॥जायतेऽर्थस्य
यत्रासौ परिवृत्तिर्मता यथा ॥११॥अन्त-
र्गतव्यालफणामणीनां प्रभाभिरुद्भासि-
तभूषु भर्त्तः ॥ स्फुरत्प्रदीपानिगृहाणिमु

क्त्वा गुहासुशेतेत्वदरातिवर्गः ॥ १२ ॥ द-
त्वाप्रहारं रिपुपार्थिवानां जग्राह यः संय-
तिजीवितव्यम् ॥ शृंगारभंगीश्च तदंगना-
नामादाय दुःखानि ददौ सदैव। १३ ॥ यत्रो
क्तानां पदार्थानामर्थाःसंबंधिनः पुनः ॥ क्र-
मेण तेन बध्यंते तद्यथासंख्यमुच्यत
१४ मृदुभुजलतिकाभ्यां शोणिमानं दध-
त्याचरणकमलभासा चारुणेनाननेन ॥
बिसकिसलयपल्लान्यात्तलक्ष्मीणि मन्ये
विरहविपदि वैरात्तन्वते तापमंगे ॥ १५ ॥
वस्तुनो यत्र संबंधमनौचित्येन केनचि
त् ॥ असंभाव्यं भवेद्ब्रूक्तऽऽमाहुर्विषमं-
यथा ॥ १६ ॥ केदं तव वपु र्वत्से कदली-
गर्भसंनिभम् ॥ क्वायं राजमतिक्लेशदायी
व्रतपरिग्रहः ॥ १७ ॥ सहोक्तिः सा भवे
द्यत्र कार्यकारणयोः सह ॥ समुत्पत्तिः
कथाहेतोर्वक्तुं तज्जन्मशक्तिताम् ॥ १८ ॥
आदत्ते सह यशसा नमयति सार्द्धं मदेन
संग्रामे ॥ सह विद्विषाश्रियाऽसौकोदंडं क

र्पतिश्रीमान् ॥१९॥ आयातेहि विरुद्धत्वं यत्रवाक्येन तत्वतः ॥ शब्दार्थकृतमाऽऽभाति स विरोधः स्मृतोयथा॥२०॥दुर्वार-बाणविभवेन सुवर्मणापि लोकोत्तरान्वयभुवापि च धीवरेण ॥ प्रत्यर्थिषु प्रतिरणं स्खलितेषु तेन संज्ञामवाप्य युयुधे पुनरेव विष्णुः ॥ २१ ॥ येनाऽऽक्रांतंसिंहासनऽमरिभूभृच्छिरांस्यवनतानि॥क्षिमायुधिशरपंक्तिःकीर्तिर्याता दिगंतेषु॥२२॥ यत्रार्थान्तरमुत्कृष्टं संभवत्युपलक्षणम्॥ प्रस्तुतार्थस्यसप्रोक्तो बुधैरवसरो यथा ॥ २३ ॥ स एष निश्चयानन्दः स्वच्छन्द तमविक्रमः ॥ येन नक्तंचरस्सोऽपि युद्धे वर्वरकोजितः ॥२४॥ यत्रनिर्द्धारितात्सारात् सारं सारं ततस्ततः ॥ निर्द्धार्य्यतेयथाशक्ति तत्सारमिति कथ्यते॥२५॥ संसारे मानुष्यं सारं मानुष्यकेषु कौलीन्यं॥ कौलीन्येपिच धर्मित्वं धर्मित्वे चाऽपि सदन्वयवत्त्वं ॥ २६ ॥ पदैस्तैरेव भिन्नै

वैकयं वक्त्येकमेवहि ॥ अनेकमर्थं य-
त्रासौ श्लेष इत्युच्यते यथा ॥ २७ ॥ आ-
नन्दप्रोल्लासयतःसमंतात्करैरसंतापक-
रैः प्रजानाम् ॥ यस्योदये क्षोभऽमवाप्य
राज्ञो जग्राहवेलां किल सिंधुनाथः॥ २८॥
कुर्वन् कुवलयोल्लासं रम्यांभोजश्रियंह
रन् ॥रेजे राजाऽपियच्चित्रं निशांते कांति
मत्तया२९॥एकत्र यत्र वस्तूनाऽमनेकेषां
निबंधनम् ॥अत्युत्कृष्टापकृष्टानां तं वदं-
तिसमुच्चयम् ॥ ३० ॥ अनहिल्लपाटकं
पुरमवनि पतिः कर्णदेवनृपसूनुः ॥श्रीक
लशनामधेयः करी च रत्नानि जगतीह
॥३१ ॥ग्रामे वासो नायकोनिर्विवेकःकौ-
टिल्यानामेकपात्रं कलत्रम्॥नित्यं रोगः
पारवश्यं च पुंसामेतत्सर्वं जीवतामेवमृ
त्युः॥३२॥प्रशंसाक्रियते यत्राप्रस्तुतस्या
ऽऽपिवस्तुनः ॥ अप्रस्तुतप्रशंसांतामाहुः
कृतधियो यथा॥३३॥ स्वैरं विहरति स्वैरं
शेतेस्वैरंच जल्पति ॥ भिक्षुरेकः सुखीलो

केराजचौरभयो ज्झितः॥३४॥पूर्वपूर्वार्थं वैशिष्ट्यानिष्टानामुत्तरोत्तरम् ॥ अर्थानां याविरचना बुधैरेकावली मता ॥ ३५ ॥ देशस्समृद्धनगरो नगराणि चसंप्रभूत-निलयानि ॥निलयाः सलीललना लल-ना श्चाऽत्यंतकमनीयाः ॥ ३६॥ प्रत्यक्षा-लिंगतो यत्र कालत्रितयवर्त्तिनः॥लिंगि-नो भवति ज्ञानमनुमानं तदुच्यते॥३७ ॥ नूनं नद्यस्तदा भूवन्नभिषेकांभसा विभोः अन्यथा कथमेतासु जनःस्नानेन शुद्ध्य ति ॥३८॥ जंभजित्ककुभिज्योतिर्यथाशु भ्रंविजृंभते ॥ उदेष्यति तथा मन्ये खलः सखि निशाकरः ॥ ३९॥मुखप्रभाबाधित कांतिऽरस्या दोषाकरः किंकरतां दधा-ति ॥ तल्लोचनश्रीहृतिसापराधान्यव्जा-नि नो चेत्किऽमयंक्षिणोति॥४०॥यत्रसा-धारणं किंचिदेकत्र प्रतिपाद्यते॥ अन्य-त्र तन्निवृत्तैयै सा परिसंख्योऽच्यते बुधैः॥ ॥ ४१ ॥ यत्र वायुः परं चौरः परं सौरभ्य-

संपदाम्॥युवानश्च धृतक्रोधा देव बिभ्यु
र्बंधूजनात् ॥ ४२ ॥ प्रश्नो यत्रोऽत्तरं व्यक्तं
गूढं वाऽप्यऽथ चोऽभयम्॥प्रश्नोत्तरं तथो-
ऽक्तानां संसर्गं संकरं विदुः ॥ ४३ ॥ अ-
स्मिन्नपारसंसारसागरे मज्जतां सताम् ॥
किं समालंबनं साधो रागद्वेषपरिक्षयः ॥
॥ ४४ ॥ क्व वसंति श्रियो नित्यं भूभृतां
वदकोविद॥असाऽवतिशयः कोऽपि यदुऽ
क्तमऽपिनोऽह्यते ॥ ४५ ॥ किमैभं श्लाघ्य
माऽऽभाति पक्ष्याख्या का कृतो यशः ॥
गरुडःकीदृशो नित्यं दानवारिविराजितः
॥४६॥बज्झंडमुत्तिसंपुटमुत्तिअमणिणो-
पहासमूहोय ॥सिरिवाहडोत्तितणआसिं
बुहोतस्ससोमस्स ॥४७॥अचमत्कारता
वा स्यादुक्तांतर्भाव एव वा ॥ अलंक्रिया-
णामन्यासामनिबंधे निबंधनम् ॥ ४८ ॥
द्वित्रिपदा पांचाली लाटीया पंचसप्त वा
यावत् ॥ शब्दास्समासवंतोभवंति यथा-
शक्ति गौडीया ॥४९॥ द्वे एव रीती गौडी

या वैदर्भी चेऽति सांतरे ॥ एका भूयः स-
मासा स्यादसमस्तपदा परा ॥५०॥दर्पो-
त्पाटिततुंगपर्वतशतग्रावप्रपाताहतिक्रू
राक्रंददतुच्छकच्छपकुलक्रैंकारघोरीकृ
तः ॥विष्वग्वर्वरवध्यमानपयसः शिप्राप-
गायाःस्फुरन्नाऽऽक्रामत्यऽयमऽक्रमेणब-
हुलः कल्लोलकोलाहलः ॥ ५१ ॥ विप्राः
प्रकृत्यैव भवंति लोला लोकोक्तिरेषा न
मृषा कदाचित्॥यच्चुम्बमानां मधुपैर्द्विजे
शः श्लिष्यत्यसौकैरविणीं करेण ॥ ५२ ॥
अर्थेन येनातिचमत्करोति प्रायः कवि-
त्वं कृतिनां मनस्तु ॥ अलंक्रियात्वेन स
एव तस्मिन्नभ्यस्यतां हंत दिशा तयैव
॥ ५३ ॥ इतिवाग्भटालंकारेऽलंकारनिरू
पणोनामचतुर्थःपरिच्छेदः ॥ ४ ॥ ॥

पञ्चमः परिच्छेदः।

साधुपाकेऽप्यनास्वाद्यं भोज्यं निर्लवणंय
था॥तथैव नीरसं काव्यमिति ब्रूमोरसानि

ह॥१॥अनुभावैर्विभावैश्च सात्विकैर्व्यभि
चारिभिः॥ आरोप्यमाणउत्कर्षंस्थायी
भावः स्मृतो बुधैः॥२॥ शृंगारवीरकरुणा
द्भुतहास्यभयानकाः॥ रौद्रबीभत्सशांता
श्चनवैतेनिश्चिता बुधैः॥ ३॥ जायापत्यो
र्मिथोरत्या वृत्तिःशृंगार उच्यते॥संयोगो
विप्रलंभश्चै त्येषतु द्विविधोमतः॥ ४॥ तौ
तयोर्भवतोवाच्यौ बुधैर्युवियुक्तक्तयोः॥
प्रच्छन्नश्चाप्रकाशश्च पुनरेष द्विधामतः
॥ ५ ॥ रूपसौभाग्यसम्पन्नःकुलीनःकु-
शलोयुवाअनुद्वृतो हृद्यवादी ख्यातो ने-
ताऽत्रसद्गुणः॥६॥अयं च विबुधैरुक्तोऽनुकू
लो दक्षिणःशठः॥ धृष्टश्चेतिचतुरर्धा स्या-
न्नायिका स्याच्चतुर्विधा॥ ७॥ लीनरागोऽ
नुकूलः स्यादनन्यरमणीरतः॥दक्षिणश्चा
न्यचित्तोपि यः स्यादविकृतः स्त्रियाम्॥
॥ ८॥ प्रियंवक्त्यप्रियं तस्याः कुर्वन्यो वि
कृतः शठः॥ धृष्टोज्ञातापराधोपि न विल-
क्षोवमानितः॥ ९॥ अनूढा च स्वकी

या च परकीया परांगना ॥ त्रिवर्गिणः स्वकीया स्वादन्या केवलकामिनः॥१०॥ अनुरक्तानुरक्तेन स्वयं यास्वीकृता भवेत् ॥ अनूढेति यथाराज्ञो दुष्यंतस्य शकुंतला॥११॥ देवतागुरुसाक्ष्येया स्वीकृता स्वीयनायिका ॥ क्षमावत्यति गंभीरप्रकृतिः सच्चरित्रभृत् ॥ १२ ॥ परकीयाऽप्यनूढैव वाक्यभेदोस्ति चानयोः ॥ स्वयमेत्यतिकामैका सख्यैवें का प्रियं वदेत् ॥ १३ ॥ सामान्यवनिता वेश्या[1] भवेत्कपटपंडिता॥ नहिकश्चित्प्रियस्तस्यादातारं नायकं विना ॥ १४ ॥ सर्वप्रकाशमेवैषा याति नायकमुद्धता ॥ वाच्यः प्रच्छन्न एवान्यस्त्रीणांपतिसमागमः॥१५॥पूर्वानुरागमानात्मप्रवासकरुणात्मकः ॥ विप्रलंभश्चतुर्द्धा स्यात्पूर्वः पूर्वोऽह्ययं गुरुः ॥ १६ ॥ स्त्रीपुंसयोर्नवा-

---

१ वित्तमात्रोपाधिकसकलपुरुषाभिलाषा वेश्या तदेवात्र निदर्शनमस्तिप्रत्तारं नायकं विनेति ॥ ६ ॥

लोकादेवोऽल्लसितरागयोः ॥ ज्ञेयः पूर्वानुरागोयमपूर्णस्पृहयोर्दृशोः ॥ १७ ॥ मानोऽन्यवनितासंगादीर्ष्याविकृतिरुच्यते ॥ प्रवासः परदेशस्थे प्रिये विरहसंभवः ॥ १८ ॥ स्यादेकतरपंचत्वे दंपत्योऽरनुरक्तयोः॥शृंगारः करुणाख्योऽयं वृत्तवर्णन एव सः ॥ १९ ॥ उत्साहात्मा भवेद्वीरः स्त्रेधाऽधर्मार्जिदानतः ॥ नायकोऽत्र भवेत्सर्वैः श्लाघ्यैरधिगतो गुणैः ॥ २० ॥ शोकोत्थः करुणो ज्ञेयस्तत्र भूपातरोदने ॥ वैवर्ण्यमोहनिर्वेदप्रलापाश्रूणि कीर्तयेत् ॥ २१ ॥ हासमूलस्समाख्यातो हास्यनामा रसो बुधैः ॥चेष्टांगवेषवैकृत्याद्धास्यो हास्यस्यचोद्भवः ॥ ॥२२॥कपोलाक्षिकृतोल्लासो भिन्नोष्ठः स महात्मनाम् ॥ विदीर्णास्यश्च मध्यानामधमानां सशब्दकः ॥२३॥ विस्मयात्माद्भुतो ज्ञेयस्स चाऽसंभाव्यवस्तुनः ॥

दर्शनाच्छ्रवणाद्वापि प्राणिनामुपजायते ॥ २४ ॥ तत्र नेत्रविकाशःस्यात्पुलकःस्वेदएवच ॥निस्पन्दनेत्रता साधुसाधुवागद्गदा च गीः ॥ २५ ॥ भयानको भवेद्भीतप्रकृतिर्घोरवस्तुनः ॥ सच प्रायेण वनितानीचबालेषु शस्यते ॥ २६ ॥ दिगालोकास्यशेषांगस्वेदगद्गदसंभ्रमाः ॥ त्रासवैवर्ण्यमोहाश्च वर्ण्यन्ते विबुधैरिह ॥ २७ ॥ क्रोधात्मको भवेद्रौद्रः क्रोधश्चारिपराभवात् ॥ भीष्मवृत्तिर्भवेदुग्रस्सामर्षस्तत्र नायकः ॥२८ ॥ स्वांसाघातप्रशंसास्फोटोत्क्षेपभ्रुकुटयस्तथा॥अनारत[1] जनाक्षेपो दलनं चोपवर्ण्यते॥२९ ॥ बीभत्सः स्याज्जुगुप्सातः सौहृद्यश्रवणेक्षणात् निष्ठीवनास्यभंगादिःस्यादत्र महतांनच ॥ ३० ॥सम्यग्ज्ञानसमुत्थानः शांतो निः

---

१ त्रारतिद्विः ।

स्पृहनायकः॥रागद्वेषपरित्यागात्सम्य-
ग्ज्ञानस्य चोऽद्भवः॥३१॥दोषैऽरुज्झितऽ
माश्रितं गुणगणैश्चेतश्चमत्कारिभिना-
नालंकृतिभिः परीतमभितो रीत्या स्फुरं
त्या सतां॥तैस्तैस्तन्मयतां गतं नवरसै
ऽराकल्प्य कालं सदा स्रष्टारो रचयंतु
काव्यपुरुषं सारस्वतध्यायिनः ॥३२॥

इति श्रीवाग्भटालङ्कारेपञ्च-
मः परिच्छेदः॥५॥

पुस्तक मिलनेका ठिकाना—

खेमराज श्रीकृष्णदास

"श्रीवेंकटेश्वर" छापाखाना—बम्बई.

जाहिरात।

श्रीमद्वाल्मीकीय रामायण।

श्रीवाल्मीकीय रामायण २४००० ग्रंथका सरल सुबोध ब्रजभाषाटीका बनवाकर छापके तैयार है जिसके बीचमें मूल और नीचे ऊपर भाषाटीकाहै. और एक वाल्मीकीयरामायणका भाषावार्तिक छपा है जिसमें मूलके अनुसार यथावत् भाषा करके मूल श्लोकोंके अंकभी लगादिये गये हैं. रामायणकी कथा पढनेवालोंको पुराण वांचनेमें बहुत उपयोगी होगा.- जिन महाशयोंको लेना होवे २३ रु० भेजदेनेसे भाषाटीकासहित इस पुस्तकको अपने स्थानपर पासकेंगे और भाषावार्तिकको १० रु० भेजनेंसे पासकेंगे. महाशयहो! इस अलभ्य लाभको शीघ्रता करिये. (इसके सब सातही काण्ड बाल, अयोध्या, आरण्य, किष्किन्धा, सुन्दर, युद्ध, और उत्तर ए)और रामायणमाहात्म्यभी भाषाटीकासहित छपे हुये तैयार हैं; जिन की इच्छा हो मँगालीजिये.

पुस्तक मिलनेका ठिकाना.

खेमराज श्रीकृष्णदास

"श्रीवेंकटेश्वर" छापाखाना—बम्बई.

श्रीः ॥

भागवचम्पूः।

श्रीरामकृष्णसूरिप्रणीता।

टिप्पणीसमेता।



मुम्बई

श्रीकृष्णदासाङ्कज-

गङ्गाविष्णु खेमराजौ

"श्रीवेङ्कटेश्वर"मुद्रायन्त्रम्।

मुद्रणमस्य पुस्तकस्य गोपालनारायणजनतायन्त्रालये।

श्रीः

रामकृष्णसूरिविरचिता

भार्गवचम्पूः ।

प्रथमः स्तबकः ।

श्रीपतिं प्रणमद्वृन्दारकवृन्दाभिनन्दनम् ॥
भववन्धच्छिदं वन्द्यं वन्दे मान्द्यनिवृत्तये ॥ १ ॥
देवः शारदपद्मकोरकमदप्रध्वंसिपद्माकुच-
प्राग्भारस्फुटचारुपत्ररचनाचातुर्यरत्नाकरः ॥
लक्ष्मीनेत्रकटाक्षवीक्षणशरव्यापारलक्षीकृतः
क्षिप्रं पक्षिपतिध्वजो वितनुतां शास्तं प्रशस्तं मम ॥२॥
निर्निमेषपदावाप्त्यै संविशन्ति वनेऽम्बुमी ॥
गुणजालयुताः सन्तो धीवरा इति मे मतिः ॥ ३ ॥
मानससंचारिपदा भव्यगुणा भूतिमाश्रिता सरसा ॥
सत्कृतिरपि बहुकाकैः कलहंसीव प्रदूष्यते कुजनैः ॥ ४ ॥

तत्र ।

---

१ वृन्दारकवृन्दो देवसमूह । २ जडबुद्धित्वनाशाय । ३ शरत्कालीन-पद्मकलिकागर्वहरौ यौ कुचप्राग्भारौ (प्राग्भारौ शैलशृङ्गौ (टेकडीति भाषा-या) ताविव कुचौ स्तनौ, 'उपमित व्याघ्रादिभि'रिति समासः) तयोः स्फुटा स्पष्टा या चारुः सुन्दरा पत्ररचना कस्तूरीकुङ्कुमादिभिश्चित्रलेख्य तद्विषयं या चतुरता तस्या रत्नाकर इव । अतीव कुशल इत्यर्थः । 'शैलाग्रे शिखरं प्रोक्तं दन्तः प्राग्भार इत्यपि' इत्यभिधानम् । ४ गरुडध्वजः । ५ शास्त मङ्गलम् । ६ निर्निमेषा देवा मत्स्याश्च । ७ काननेषु उदकेषु च । ८ मतिरैश्वर्यं भस्म च ।

भाव्यालंकृतिहृद्यवर्णसुपदन्यासोज्झितामङ्कृतिः
क्वेय नूनमनल्पदूषणपदं स्यादेव किं तावता ॥
सन्तः सन्ति सदा यदास्यसरणीसंचारिणः प्रस्फुर-
द्दोषास्तोपे गुणाः स्युरम्बुदमुखैरम्भासि सिन्धोरिव ॥५॥

अस्ति च चतुःसमुद्रवलयमध्यगतसकलवसुन्धराखण्डमण्डनं खर्वीकृतशर्वारिगर्वपर्वतेः विनिर्जितकोपाटोपेः स्फुरज्जटामुकुटविराजितोत्तमाङ्गैः पुरन्दरादिवन्दितवन्द्यसुन्दरमुकुन्दपदारविन्दमकरन्दषट्पदैरावेरतानित्यानित्यवस्तुविचारपरवशैर्पुनेजननैर्जनितसौभाग्यं सारिकासारसहंसशुकचक्रवाककोकिपरेपुष्टकण्ठध्वनिभिः पान्थानाह्वयदिवातिरमणीयमसमप्रदेशं कस्तूरीहरिणवराहसमुत्तुङ्गमातङ्गगवयकृष्णसारमृगपञ्चाननप्रभृतिभिर्वनचरैरप्यन्योन्यभवनपरैः पशुभिराधिष्ठितम् अधरीकृतनन्दनवनरामणीयकं निजाविमलकीलालबहुललोलकल्लोलोच्छलल्ललिततरतुषारपावित्रिताखिलराशे(?)जनाभखण्डसुकीर्तिकेतुयष्टेः स्नानार्थागताकेन्नरीगणनिर्धौतस्तनकुङ्कुमपङ्काङ्कितोत्तुङ्गतरङ्गवत्या भगवत्याः सरस्वत्यास्तीरम् ।यत्र परोपकारार्थजन्मानोऽनेकशाखिनः कमनीयपरिच्छदाः फेनपा इव पादपाः सन्ति । यत्र च लताः सर्वर्तुपुष्पवत्योपि अम्रदोषावकाशिन्यो मुनिनिचयावचितकुसुमाः सन्ति ।

चूताश्वत्थकपित्थकुन्दतिलकप्लक्षाक्षसन्तानकै-
र्बिल्वानिलतमालतालपनसप्रोच्चप्रियालेङ्गुदैः ॥

---

१ ह्रस्वीकृत-लघूकृत- । २ परपुष्टाः कोकिलाः । ३ रामणीयक सौन्दर्यम् । ४ कीलाल उदकम् ।५ फेनपाः मेघटवा? । ६ 'तिलवा'इति भाषायाम् । ७ कल्पवृक्षाः ।

खर्जूरार्जुनभूर्जशोध्रबकुलैराम्रातकाद्यैरपि
व्याप्तं तद्वरभूरिभूरुहगणैर्देवैर्यथा विष्टपम् ॥ ६ ॥
बहुलशकुनि विपुलार्जुनमभितसकृपेभीष्मशतद्रुपदम् ॥
सुबहुशिखण्डिसमाधिकं भारतचरितात् सरस्वतीतीरम्॥७

नूनमीर्ष्याभरादिव तयैव सरस्वत्या ।
अमरपुरसमृद्धिस्पर्द्धया वर्धयित्वा
निजरुचिरतटाकप्रान्तसौभाग्यभाग्यम् ॥
तदनुभवसमोदस्तापसानां समूहः
समकृतमुरसम्पद्यस्य हः सस्पृहोपि ॥ ८ ॥

कदाचित्तत्र निगमाध्ययनचयनादियजनदत्तावधाना विषविषभविषयाविषह्यरयग्रस्तविवेकग्राम्यजनानुग्राहका निखिलनिगमार्थपारदृश्वानो वशीकृतकरणान्तःकरणमातरिश्वानो भूरि यज्वानस्तपस्विनोवतेरुर्येषामतिविचित्रतमं चारितम् ॥

भवे रता अप्यभवाश्च केचिद्रमापसक्ताअपि नो रमापोः ॥
हिरण्यगर्भोपमृतास्तथापि हिरण्यगर्भास्तु न ते द्विजाढ्याः॥९॥

---

१ आम्रातको मधूकवृक्षः । २ जगत् । ३ शकुनिः पक्षिः दुर्योधनमातुलश्च । ४ अर्जुना वृक्षा. अर्जुनो भीमानुजः । ५ सकृपाणि सुदर्शनानि भीष्माणि भयङ्कराणि शतानि अनन्तानि द्रुपदानि वृक्षस्थानानि यस्मिन् पक्षे कृपः कृपाचार्यः भीष्म. प्रसिद्ध. द्रुपदः द्रुपददेशराजा प्रसिद्ध. । ६ शिखण्डी मयूर· भीष्मशत्रुश्च । ७ करणानि इन्द्रियाणि । ८ भवः शङ्करः ससारश्च । ९ रमापः श्रीपतिर्विष्णुः द्रव्यवांश्च । १० जगदुत्पत्तिकरो विष्णुः । ११ हिरण्यगर्भः श्रीमान् ।

संसारतापसंशान्त्यै तपोभिस्ते तपस्विनः ॥
चित्रं सततमर्चन्ति श्रीवरं जनतापदम्[1] ॥ १० ॥

अवतीर्य सरस्वतीतीरं वीरुत्तरुणतरुसमुन्निद्रसान्द्रकुसुमसम्मूहोद्भ्रमद्भ्रमरमञ्जुसिञ्जनप्रणुन्ना[3] इव स्वयमपि तत्तटपाविद्यहृतचित्ताः सत्रार्थं मन्त्रयामासुः ।

इतो भूमी रम्याऽसितमृगपदाङ्कैरतितरा-
मितो दर्भाः शश्वद्धरित इह नीवारपटलम् ॥
इतो वातः सारस्वतजलकणान् मूर्छति वहन्
पिकः प्रोच्चै रम्यं मधुसमयमावेदयति नः ॥ ११ ॥

अपि चास्माकम् ।

यज्ञसम्भारसौलभ्याद्विलुम्पन्मनसामिह ॥
वृत्तिमुत्साहयत्येतत्तीरं सारस्वतं क्रतौ ॥ १२ ॥

तद्युज्यतेत्र यज्ञभागभुजः सुधाभुजः सभाजायितुम् । ततः ।

युक्तमित्येव ते सर्वेप्यनुमान्य समुत्सुकाः ॥
समग्रां सत्रसामग्रीं कल्पयांचक्रुरञ्जसा ॥ १३ ॥

अनन्तरं कर्षणादिना भूशुद्धिं विधाय विरचितश्च ।

तत्तच्चिन्हवदुन्नतोन्नतचतुर्द्वारः सुधारञ्जितः
प्रत्यग्रस्फुरदाम्रपल्लवभरकूलोल्लसतोरणः ॥
सद्भूपैराभिशोभितश्च निगमध्वानैकशाली पृथु-
प्राग्वंशः[5] कुशनिर्मितास्तरणवान् रम्यः क्रतोर्मण्डपः१४॥

---

१ दुष्टजनाना तापद जनता जनसमूहः तस्य पद स्थानम् । २ लतासम्मूह वीरुत् । ३ प्रणुन्नाः प्रेरिताः । ४ सुधया चूर्णेन रञ्जितः धवल इत्यर्थ । ५ पृथुः भव्य· प्राग्वशः यस्मिन् । हविर्धिहात्पूर्वदेशे सदस्यादीनां यद्गृह स प्राग्वश इत्यभिधीयते ।

अग्निशालायां च गार्हपत्याहवनीयादीना शरणानि मेखलाभिरुपशोभितानि विरचय्य ।

ततः स्नात्वाथ सलिले सरस्वत्या मुनीश्वराः
कृतजप्याश्च ते विप्रा यज्ञवाटमुपागमन् ॥ १५ ॥

प्रविश्य तस्मिन्विशालेपि सशाले मण्डपे प्रागग्रेषु दर्भेषूपविष्टाः प्रविभक्तकार्याधिकारा मुनयो महता पुण्याहघोषेण दीक्षा प्रवर्तयामासुः । तत्र प्रथमं मुख्यदेवतोद्देशेन क्रियमाणे सङ्कल्पे विकल्पस्तेषामन्तःकरणसदनं मदमत्तमातङ्ग इवोच्चशिलोच्चयदरीमध्यमध्यतिष्ठन् हरिहरविधयः ।

जगतामीश्वरत्वेन त्रयः पूज्यास्तथाप्ययम् ॥
नरः कस्यानुसरणादत्यन्तं क्षेममश्नुते ॥ १६ ॥

इति तथाविधे व्यतिकरे हिरण्यगर्भोपासकाः प्रोचुः । अहो कथमेते पण्डिता अपि हस्तस्थितवस्तुवीक्षणकृते दर्पणापेक्षावता पन्थानमनुसरन्ति । यतः स्पष्टमेवैतत् ।

येन स्वीयेन धाम्ना ज्वलदनलचलज्ज्वालमालागरिम्णा
पुष्टेनेष्टैस्तपोभिर्लयसमयतमस्तोमलीढान्तराणाम् ॥
नृणां पूर्णात्मबोधप्रमदमविदुषां दृष्टिरुन्मीलिता द्राक्
यष्टव्यः सृष्टिनाथः स तु सततमतः सर्ववेदैकसर्गः ॥१७॥

तदुत्तरं सानुशयं शैवाः ।

यदङ्घ्रिप्रेक्षार्थागतमुदितवृन्दारकजनः
प्रभाचक्रभ्राजन्मुकुटतटसघट्टगलितैः ॥

---

१ स्थानानि । २ यज्ञस्थानम् । ३व्यसने । ४हिरण्यगर्भो देव (ब्रह्मदेव.)।

स्फुरद्रत्नैर्नित्यं जानेतासिकतं प्राङ्गणमहो
यदीयं त देवं भवमिह भजामः सुरवरम् ॥ १८ ॥

तदूर्ध्वं भागवताः ।

यो नेत्रश्रुतिभारतीप्रभृतिभिर्विज्ञायते नो गुणै-
र्यश्चाम्नायसमूहशीलनपरैस्तात्पर्यवृत्त्योच्यते ॥
तत्त्वानां निचयं प्रविष्ट इति या सम्भाव्यते स्वेच्छया
भक्तानां च भवाय भावितनुः सेव्यो हरिः सर्वदा॥१९॥

इत्याग्रहग्रहोपमग्रस्तान्तरात्मानो महात्मानः स्वस्वोपासन-वासनापरवशत्वेन परस्परं निजगदुः । ततः केचित् सुविचार-शीलनपराः । आः किमेतेन विचाराचतुरेण भवतां विवादेन । तन्निशम्य वैष्णवादयः सर्वेप्येकीभूताः । कथमविचाराचतुरत्वम-स्माद्विवादस्य यतो ब्रह्मादिदेवतानाम् ।

तिसृणामपि भूरिभाग्यभाजां जगदीशत्वमयं जगाद देवः ॥
स्मृतयश्च ततो वयं प्रपन्नाः शरणं तच्चरणावघापहत्यै ॥२०॥

विवेकिनः सन्त्यमुकं तथापि । यथा वा ।

दीपानामरुणासितादिकाचसारैः
क्लृप्तेषु स्फुटचषकेषु संस्थितानाम् ॥
दीपत्वं यदि च समं तथापि कान्तिः
श्वेतस्थे बहुलतमा तमांसि हन्ति ॥ २१ ॥

एवमेव निगमस्तुतपदनीरजानां तदुपाधिकृतवैषम्यजुषां तेषामी-श्वरत्वाविशेषेपि यत स्तूर्णमर्णवसारे संसारे निमज्जतां जन्मिनामज्ञान-

---

१ स्वतन्त्रपात्रेषु ।

निवृत्तिद्वारा तत्स्वरूपसम्प्राप्तिफलमञ्जसा भविष्यतीति विज्ञानार्थं काश्चित्सम्प्रेषयितव्यः । ततः सर्वेप्येकमत्यमनुसृत्य को वै प्रेषायेतव्य. कश्च कार्यक्षम इति च विचारयामासुः । विचार्य च धैर्यचातुर्यादिचर्यावद्भुर्यं विधातृपुत्रं भृगुं तद्योग्यं मत्वा तं प्रत्यूचुः।

भृगो याहि क्षिप्रं प्रथितगुणशाली[1] सकरुणो
भवाब्धेरातङ्कांचरणशरणोत्तारणपरः[2] ॥
जगज्जन्मत्राणप्रशमनविलासेष्वयमिति
त्रिषु ज्ञात्वेहि त्वं मुनिनिचयमादाय झटिति ॥ २२ ॥

स इत्थमाकर्णितमुनिजनवचनो भृगुः स्वचित्तेऽचिन्तयत् । अहो किमेतत् । छलसाध्यमिदं कार्यं मां प्रत्युपदिशन्ति । नायं हितोपदेशस्तर्हि त्यजेदेकं कुलस्यार्थे इति सर्वेपि मां महदवज्ञान्धकूपे प्रवेशयन्ति । तदिदमकार्यमनार्यक्षममवधार्य प्रावोचत् ।

कथं जगत्पूज्यपदेषु शश्वच्छलप्रयोक्ता भविता समृद्धः ॥
जिजीविषुः प्राणहरं निगीर्य क्रूरं गरं को हि भवेत्कृतार्थः २३

एतन्निशम्य मुनयः । न त्वमीशानां छलमकार्यं कृत्वापि पापभाक् । यतः स्वार्थं न प्रवृत. सर्वलोकशङ्कापरिहारेण परोपकारार्थम् । अकार्यकारिणोपि परोपकारिणो न दूष्यन्ते । शृणु तावत् ।

सशम्भोरम्भोधिं प्रभवमभियातुं पशुपते-
र्विष किं व्यापारो जगति कथयस्वास्तुतिपदम् ॥
स्तुतस्त्वाष्टुप्राणप्रमथनविधातुः सुरपतेः
प्रवृतिः सौभाग्यं वितरति परेषामुपकृतौ ॥ २४ ॥

---

१ प्रसिद्धगुणयुक्तः । २ आतङ्को रोग.पीडा वा ।

तस्मात्परोपकारार्थमकार्यप्रवृत्तिरपि न दूषणार्हा । प्रत्युत भीतेष्वपि फलतीति । पश्य ।

सम्प्राप्तं बत कर्दमादिभिरलं कष्टात्कलत्रं हरे-
स्तुष्टादेकमथाच्युतेन धरणीजन्मानमुन्मथ्नता ॥
आदित्यार्थकरेण सार्धमभितस्तेषां सहस्राधिकं
लब्धं कोपि समीहतेष्टफलके लोकोपकारं विना ॥२५॥

तत्तावत् त्वमप्यनया लोककर्तृप्रवृत्त्यापि भविष्यसि प्रशंसापात्रमित्युक्त्वा तूष्णीं स्थितेषु तेषु महर्षिषु ।

अथ परिहृतशङ्कातङ्कपङ्को मुनीना-
मनुनयपटुवाचां वाचमुच्चैर्निशम्य ॥
तदुदितनयवर्त्मन्यर्पितात्मार्यवृत्तः
सरभसमभिगन्तुं व्यापृतोभूत्तदर्थे ॥ २६ ॥

इति सूरीन्द्रश्रीमद्रामकृष्णविरचितायां भार्गवचम्प्वां प्रथमस्तबकोयं समाप्तः ॥ १ ॥

—०:०—

द्वितीयस्तबकः ।

अत्रान्तरे । प्रभूततमतमस्विनीतमस्तोमसम्भूतजनयनोपरोधसंहारैकचतुरकरः सहस्रकरः समतिक्रम्य प्राचीमुखान्नभःसरणि स्वकरपरिमृष्टवारुणीदिगम्बरः कामुक इव शनैरस्ताचलविशालमौलिमनुससार । आश्चर्यमिदम् ।

---

१ अतिशयेन प्रभूता । २ आकाशमार्गम् ।

पुंसां पांसुहृदंशुमानयमहो निर्दोषरागामिमां
मानार्हामपि पद्मिनीं स्वरमणीं त्यक्त्वा प्रतीच्यां रतः ॥
तत्सङ्गाय तदम्बरं परिमृशन् दोर्भिः प्रयात्यग्रतः
कष्टं धामवतोपि तस्य चरितं जारापराधस्तु कः ॥ १ ॥

अपि च ।

कृत्स्नं भूचक्रवालं निजकरनिकरैः सम्प्रशाम्य प्रचण्डै-
श्चातुर्वर्ण्यं च तत्तत्सुविहितकरणे योजयित्वाऽन्यलोकम् ॥
प्राप्ते कालेथ पश्चात्सपदि पुनरयं दीपसंक्रामितश्री-
रस्तं प्रत्येति कृत्वाप्यहह दिनकरः कोकिलोकं सशोकम् ॥२॥
अभ्युदये भवति नरः पूज्यो न विनाशकाल इति सिद्धम् ॥
अद्भुतमिदं यदर्व्यैरुदयेऽस्तमनेपि पूज्यते भास्वान् ॥३ ॥

इति कौतूहलादनेकविधं तर्कितवत्सु जनेषु । अस्तंगतवति भगवत्यंशुमति । अतिबहलतमतमस्तोमसंपूरिताम्बरतलोयं भुवनगोलको रत्यञ्जनकरण्ड इव संवृत्तः । अथ वा ।

निजकरपरिमर्शोद्भूतनूत्नप्रमोद-
प्रसरसमनुरञ्जद्वारुणीसङ्गसक्तः ॥
रविरसितपटेन व्यावृणोद्भन्तुकामो
भुवनमिव सलज्जास्वन्धकारच्छलेन ॥ ४ ॥

ततः सुगूढतरप्रस्तरोच्चयकन्दराधिष्ठितेषु वनचरसमूहेषु । भयादिव सञ्चरत्सूपवनतरुकोटरान्तरालतलं विहङ्गेषु । सनदत्सु च काककुलस्पर्द्धान्धीकृतादिवान्धेषु । मानवतीष्विव मुकुलितासु

---

१ तेजस्विन. । २ सुखेन यथातथा । ३ चकोर समूहम् ।

कमलिनीषु । प्रियविरहदूयमानसेषु कोकलोकेषु । प्रोद्यद्द्रव्ययौवनमदालसाङ्गनाङ्गरङ्गेषु रन्तुकामे रङ्गोपजीविनीव शनैः सञ्चरतीव भगवति मकरध्वजे ।

व्यसने इव सप्तांशुदीप्तजिह्वाप्रदाहिते
नभसि प्रोद्यताः किंतु स्फोटका इव तारकाः ॥ ५ ॥

अपि च ।

भास्वत्कराग्निसदग्धं नभोभस्मेव मेचकम् ॥
यास्तस्मिन्विस्फुरत्तारास्ता हुताशकणा इव ॥ ६ ॥

अथ वा ।

ध्वान्तस्यान्ताय गच्छन्नविरहवतीं प्राग्दिशं प्रेक्ष्य दत्वा
सूर्यो धुर्यः स्वहस्ताहृतगगनसरस्तारहारानयासीत् ॥
मग्नं तं पश्चिमाब्धौ परयुवतिवशाद्वीक्ष्य पूर्वाकृतोरो-
घातभ्रश्यत्समुक्तो ज्वलितमिव नभस्तारकांढचं वदन्ति ॥७॥

ततः कलावानपि स्वीयकलाकलापेन निखिललोकलोचनानि कुवलयानि चाह्लादयन्नमिताशिखरराजितमुदयाचलमूर्धानमारुरोह

रतिनाथसहायतां प्रपन्नः कुमुदानन्दकरः कुरङ्गलक्ष्मा ॥
ककुभां वलयं विभासयन्त्सन्नुदगादिन्दुरमन्दकान्तिकन्दः ८

नूनमिन्दिराबन्धोरिन्दोर्मदनसहायत्वं श्रिया प्रार्थितेन भगवता श्रीशेनैव प्रतिपादितम् ।

गीर्वाणैः संप्रमथ्य प्रसभमपहृतश्रीः पिता मे कलावां-
स्तत्सूनुर्बन्धुरिन्दुर्मम वितर विभो वित्तिमत्सानुरूपम् ॥

---

१ चक्रवाक समूहेषु । २ चन्द्रे । ३ चित्र वर्णम् ।

पद्मावाक्यानुरोधादिति दनुजरिपुः स्वीयसूनोः शशाङ्कं
वीरं विश्वं जिगीषोः सपदि रतिपतेः साह्यभूतं चकार ॥९॥
यातेस्तं चण्डभानौ निशि निबिडतमस्तामसं पूरितायां-
मिन्दुर्नीलाम्बरेणावृतवपुरसितस्यास्यमङ्कच्छलेन ॥
कृत्वैवं मानिनीनां मनसि मतमहो मानमाच्छिद्य चित्रं
भीत्यारूढः कुरङ्गे परिपतति नमस्याशु राजा द्विजानाम् १०

अत्र हेतुः ।

मानाभावात्सपत्न्या अनुनयजनितं सौख्यमप्राप्यमाणं
ज्ञात्वा न्यासात्तदिच्छुस्तमथ विनिदधे रोहिणीचित्तवृत्तौ ॥
स्वस्यासौ सन्निधानादपसरति ततस्तन्न विज्ञाय जाड्या-
द्भूयोभूयस्तदर्थं विधुरतियतते नाधुनाप्याप्तकामः ॥ ११ ॥

अपि च ।

वयं विजितेच्छाया विषयसङ्गशून्या वयं
वयं प्रशासितेन्द्रिया इति च गर्वभाजो नराः ॥
स्मरेण जयता ध्रुवं विजित एष तन्नासिका-
विलेपनकृते सुधाचषक इन्दुरुज्जृम्भते ॥ १२ ॥
सौभाग्यं किल मूर्तमेव ककुभां लीलारविन्दांशितं
लक्ष्म्या देवनकन्दुकः किमु रतेः पात्रं सुधापायिनाम् ॥
शृङ्गारस्य करण्डकः किमुदधेः फेनस्य पिण्डश्रिया-
दित्थं सजनयन्भ्रमं समुदितः प्रोद्दामधामा विधुः ॥१३॥

---

१ नक्षत्रराट् चन्द्रः । २ प्रीत्युत्पन्नम् । ३ जितकामाः । ४ सुधपात्रः सुधा अमृत चूण च । ५ दिशाम् । ६ क्रीडागेण्डुकः ।

इत्थं तर्कयत्सु लोकेषु भृगुरपि सुधांशुधामधवलितविपुलना-
रान्तरालो वियच्चरचकोरनिचयस्यामृताशनशालामिव सम्प्रवृत्तां
त्रियामां समालोक्य विष्टम्भितगमनवेगः सम्पादितसान्ध्यविधि-
श्च तैरेव तपस्विभिः सह तत्रैव तां निशामनैषीत् ।

कोकानां विरहेण नूतनरतौ सीदन्नवोढाधिना
कान्ताश्लेषसुखानुरक्ततरुणीप्रेमातिरेकेण च ॥
पद्मानां परिमीलनेन कुमुदप्रोन्मीलनेन स्वप-
ल्लोकस्वापसुखेन सार्धमगमद्दोषा[1] दिशं पश्चिमाम् ॥१४॥

ततः ।

अर्धोन्मीलत्कमलमुकुलोपान्तनिर्मुक्तगुञ्ज-
त्षट्पादालीकलरवनुतस्फीतसौभाग्यपूरम् ॥
दिग्मालिन्यप्रसरगरलग्रासकर्पूरगौरः
सुप्तोद्बुद्धद्विजकलकलैः प्रादुरासीत्प्रभातम् ॥ १५ ॥

तस्मिन्नवसरे ।

क्रीडामुत्थितपक्षिपक्षचलनैर्मालिन्यसत्यांगतः
सत्कारं वपुषो जनोत्सवचयप्रेक्षास्फुटत्पङ्कजैः ॥
हास्यं चापि विधाय भर्त्रुपगमाद्यानं विना चालये
प्राची सङ्गतभर्तृकेव समभूदुत्तीर्णचर्णिव्रता[2] ॥ १६ ॥

अपि च ।

खण्डितामिव तां प्राचीमनुनेतुमिवांशुमान् ॥
स्वकरस्पर्शमात्रेण कृतवाननुरागिणीम् ॥ १८ ॥

---

१ दोषा रात्रिः । २ रक्षितां प्रीतियुक्ता च ।

बृहत्तिमिरसिन्धुरप्रमथनार्थमुद्गच्छतो
हरेः सपदि कस्यचित् समुपलेलिहानस्पृहा ॥
मुखाद्बहिरुपागता ललितशोणजिह्वेति किं
ततान भुवि विस्मयं तरणिबिम्बमर्धोदितम् ॥ १९ ॥
नभोम्भस्तामिस्रप्रसरदतिमालिन्यशरदः
सहस्रांशोरुच्चैरुदितवति बिम्बे द्युतिमति ॥
तमोनाष्टद्रोत्राविवर इव संलीनिपरमं
मुनीनां यच्चित्ते तदपि परिहर्तुं भृगुरगात् ॥ २० ॥

उषसि सरिज्जले निमज्जनं विधाय कार्यभरादिव संजातसङ्कोचनं नित्यकर्म समाप्य कृतविषयवासनानिधानांस्तपोधनानविलम्बितं जिगमिषुर्भृगुः सविनयमिदमभाषत ।

भवत्तथ्यवचःपथ्यपाथेयपथिकः पुमान् ॥
पाथोधिमपि वीथ्याम्बुप्रायं न मनुते कथम् ॥ २१ ॥

तत्कृतकल्याणरचनेन भवदाशीर्वचनेन समुत्पन्नकार्यविधानदाक्ष्योहं निर्विघ्नं गन्तुमुत्सुकोस्मि मामनुजानन्तु भवन्त इति । अथ कथनीयकीर्तय ऋषयः प्रोचुरुच्चैः ।

पन्थानश्च शिवास्तबामलमते गच्छन्तु कण्ठीरवक्रीडादारितदन्तिराजकलभैर्जुष्टां दशामार्तयः ॥
याहि क्षिप्रमुपैहि तात चपलं स्तुत्यं च कृत्यं बुधैराश्लिष्टं प्रविधाय सायक इव श्रीकण्ठचापच्युतः ॥२२॥

---

१ सिंहस्य सूर्यस्य । २ गुहायानित्यर्थः । ३ सिंहेन क्रीडया उत्पाटितो यः करिशावकः तत्प्राप्ताम् । ४ पीडा. । ५ पिनाकधनुषः प्रेरितः ।

तत्तात कृतकृत्यस्य तव क्षिप्रं पुनर्दर्शनमस्तु इति ।

मुनीशानां याशीर्वचनरचनोत्पादितधृतिः
प्राशान्तव्यामोहः सपदि सनितान्तप्रमुदितः ॥
त्रिलोकीसञ्चारक्षमगतिरजस्यौधिवसतिं[1]-
प्रतस्थे प्रस्थानोचितविधिमुपास्येष्टफलताम् ॥ २३ ॥

इति सूरीन्द्ररामकृष्णविरचितायां श्रीभार्गवचम्पवां द्वितीय-स्तबकोयं समाप्तः ॥ २ ॥

—o—

तृतीयस्तबकः ।

—o:o—

ततो मृगुर्गच्छन्नध्वनि कृत्यसिद्धिसूचकान् शुभशकुनानवलोक्य सहर्षम् ।

ध्वाङ्क्षा[2] दक्षिणतः प्रयान्ति सहसा चाषाः पुनः सव्यत-
श्चेतो मोदभरानतं च हरिणी शावेन साकं ययौ ॥
मन्दं गन्धजलौघबिन्दुनिचयप्रोद्भूतभारादिव
वाति श्लिष्टवियोगिनीहृदवनीसीरः[3] समीरः पुनः ॥ १ ॥

तत्सर्वथा कृतकार्योहमार्यदर्शनार्थमागयिष्यामीति विचिन्त्य अनेककोटिविमानवलयशालिना त्रिदिवाध्वना विलम्बितपदं संचरन् । ज्योतिष्टोमादिना प्राप्तनाकसौख्यान् सुकृतिमुख्यान्[4] विलोकयामास ।

---

१ ब्रह्मण स्थानम् । २ काकाः । ३ वियोगिनीहृदयरूपायां पृथिव्या लाङ्गलमिव दुःखप्रद इत्यर्थः । ४ पुण्यवन्मुख्यान् ।

क्वचिद्विबुधसुन्दरीसरसतानसारस्वर-
प्रभूतरसलालसप्रसृतकर्णशृङ्गारकः ॥
क्वचिद्युवतिकोमलावयवसौष्ठवालोकन-
प्रदत्तनिमिषोज्झितस्तिमितनेत्रपङ्केरुहः ॥ २ ॥
क्वचिच्चटुलकोकिलाविकलकण्ठघण्टारव-
प्रतिध्वनितपूरिते महति नन्दनाख्ये वने ॥
स्मरप्रहितसायकव्यतिकरातिभीरुः स्वयं
प्रयाति च मृगीदृशः स्तननगान्तराले जवात् ॥ ३ ॥
क्वचिल्ललितनीविसंत्रुटितहारभाराद्भुत-
व्युदस्तकुचचोलके घटितहस्तमात्तालकम् ॥
प्रदष्टरदनच्छदं त्रिदशवारवामभ्रुवा
समं समरमारभत्स्मरजयाय काश्चित्कृती ॥ ४ ॥
इति सपदि विलोकयन्नयज्ञो
दिविचरकेलिकलाकलापमारात् ।
सुरसदनसदो विनिन्द्य दूरात् ॥
त्वरितपदं प्रययावसज्जमानः ॥ ५ ॥

अपि च ।

गीर्वाणवाणिनीभिः सहपुण्यजनव्ययोपयोग्याभिः ॥
रमतः सुरानमन्यत राजा वाराङ्गनाभिरिव लुब्धान् ॥ ६ ॥

इत्यतिव्रज्य वृन्दारकवृन्दममन्दगतेन तत्पुरस्थान्यतिक्रमितुं कृतवेगे भृगौ ।

---

१ वेगेनेत्यर्थः । २ नीतिज्ञः ।

स्वर्लोकं समतीत्य गच्छति पुरस्तास्मिन्नतर्किस्फुटं
देवैर्वासरमात्रलङ्घितहरिश्चक्रः स सौरो हरिः ॥
किंवा पादपपादपाटनपटुस्तीव्रो नभस्वान्पुनः
काकुत्स्थस्य किमुत्पथाशरशिरःसञ्चारसारः शरः ॥७॥

एवं तर्कितवत्सु सुपर्वसु महर्लोकादिलोकानतिक्रम्य किन्नरैः किन्नरीभिः समं सततं सङ्गीतविनुतरिङ्गत्तरङ्गां गङ्गामवगाह्याग्रतः प्रतस्थे ।

जनकभवावृत्तान्तं विज्ञातुं व्योमवर्त्मनेव सुधीः ॥
रभसा लङ्कास्थानं विधिसूनुरगात् समीरसूनुरिव ॥ ८ ॥
सत्यलोकाभिधा यस्य सार्थकानन्यपेक्षया ॥
नान्धस्येव पितृप्रीत्या नाम राजीवलोचनः ॥ ९ ॥
न यत्र गच्छन्त्यघसंघसंगिनो न नास्तिकाचारपथानुसारिणः ॥
न योगनैष्ठिक्यशमाद्यकारिणस्ते यान्ति येधर्मधनैकशालिनः १०॥

यस्मिंच्छ्रीमद्भगवतो विराड्रूपस्य विष्णोः शिरोभूते स्वीकृताकृतयः श्रुतयः समवलोक्यन्ते । नैतावतैव ।

संवत्सरायनयुगर्तुसपक्षमास-
काष्ठाक्षणप्रहरघस्रमुहूर्तकाद्याः ॥
कालप्रधानमहदिन्द्रियचित्तधर्म-
प्राणादयस्तनुभृतो निवसन्ति यस्मिन् ॥

यश्च ।

---

१ स्नात्वा । २ हनूमान् ।

बृहद्भृतवतां प्रेङ्खद्विमानै. सर्वतो वृतः ॥

यथा सूर्योदयोन्मीलत्पद्मकोशः शीलीमुखैः ॥ ११ ॥

परिखाप्राकारोच्चतरगोपुरैः सर्वतः कमनीयतमस्तमासि स्वकान्तिकलयाकवलयन् विराजते। यत्समंततः सततवसद्वसन्ताञ्चितवासं कारिकासिकुसमसौरभ्यलुभ्यन्मधुकरनिकरमृदुमधुरझाङ्काराभिसाराव्यापृतविरहाधीरमधुकरीगणपक्षविपक्षोत्ववमानसञ्चलन्मञ्जुसन्तानतरुपल्लवैरनिशं दिव्याङ्गनासंगातिसक्तानां यूना कृतमारविडम्बनानि संत्युपवनानि ॥ १२ ॥

यत्र स्वयं सृष्टिविधानदक्षो दक्षादिकाध्यक्षगृहीतशिक्षः ॥ साक्षात्स्वयम्भूर्निवसत्यभीक्ष्णं कः क्षीणधीस्तं क्षमते मतोष्टुम् १४

यस्मिन्निखिलजगन्निर्याणवैदग्ध्यनिधेर्विधेरिति सभा । यस्यामखिलनिगमार्थपरिशीलनपरिज्ञातधर्माद्यनेकसाधनसमूहपरिहृतहृत्कषायास्तत्क्षणे मोक्षपदप्राप्तिक्षमा अपि स्वोपास्यचतुरास्याभिमत्या सम्प्राप्तद्विपरार्धावसानव्यवधानाः पूर्वचित्त्याद्यप्सरसां मधुमाधुरीसमधुरीकरणपटुमाधुर्यसरसङ्गीतश्रवणजनितानन्दतुन्दिलमनसस्तपास्विनः सभ्यत्वं भजन्ति। यस्यां च वासवादिविबुधविद्याधरसिद्धगन्धर्वैर्निजमुकुटतटखचितविमलहीरनीराजितचरणराजीवः प्रजासर्गनोदितप्रजापतिमण्डलो जगन्निर्माणप्रवणान्तःकरणः स्वीयमध्यासनमध्यास्ते । तस्मिन्महताध्वना सञ्चरन् क्वाप्यसज्जमानोद्यैव मज्जनहृज्जानामीति सज्जमानः सज्जनाग्रणीः पथि

---

१ भृङ्गसमुदाय् ।

पाथे नमज्जननमस्यानपेक्षो विघटितपटुकपाटिकाद्वारः समतिक्रम्य इन्द्रनीलमणिविरचितसम्यक्कुट्टिमान्तरान्तरनिबद्धविधुकान्तकान्त्युपहसितभरणं सभाङ्गणमुल्लङ्घ्य भृगुः ।

परिहृतातिमिरौघं पावकोद्वर्तकार्त[1]-
स्वरविरचितभित्तिव्युप्तरत्नप्रभाभिः ॥
अथ झटिति सभान्तं न्यस्य भीतिर्दिवेशे
निजजनकसुनृत्यद्भूतटीसूत्रधारः ॥ १५ ॥

सति कृतप्रवेशे तस्मिन् ।

चिरसङ्गतयोः पितृपुत्रयोः प्रियसङ्गमम् ॥
पश्यामो हन्त हृष्यामः प्रणयोद्रेक[2]दर्शनात् ॥ १६ ॥

एवं समुत्सुकेषु सभासत्सु भृगुरपि विधातुरविदूरे सञ्चरन्नप्यकृतगुणवर्णनप्रणामः स्वप्रौढं नाटयन् सार्वज्ञं निजपितरमनवेक्ष्यैव संविवेश ।

सानन्दोपि सवन्दनादिषु पितुस्त्यक्तार्यमर्यादवत्सावज्ञं न चकार कारणवशात्तस्मै प्रणामादिकम् ॥
सोत्कण्ठापि चिरागतप्रियपरिष्वङ्गाय लज्जावशा-
द्दु[3]न्मुक्तप्रणयेव भर्तरि परिरम्भं सतीवाङ्गना ॥ १७ ॥

तत्रावसरे सदःसमक्षमात्मावहेलं मन्वानः स मन्वादिजनपिता कमलासनः ।

रोषावेशकषायिलोचनगुणभ्रूचापवेगच्युता-
पाङ्गोद्दामशिलीमुखैः स बिभिदे हृत्पङ्कजातं भृगोः ॥

---

१ कार्तस्वरं सुवर्णम् । २ प्रणयः प्रीतिः उद्रेकः अतिशयः। ३ गतप्रीति. ।

नैव स्नेहवशेन ते विदधिरे भेदं मुदा रेमिरे
तस्मिन्नस्तमितासु ते पुनरहो मोहस्य चित्रा गतिः ॥१८॥

एवमपि रोधनिःशेषितधृतिर्विधूतनयं निजतनयं दिधक्षन्निव विलोकयांचक्रे ।

आश्चर्यं किमिदमधीरमानसानां
क्रोधो यद्धुरतितरां धृतिं नराणाम् ॥
यस्यास्योदयसमकालमेव चक्रे
सावज्ञं शतधृतिमाशु धैर्यरिक्तम् ॥ १९ ॥

पुनः स्वतनयेऽविनयसम्भवः कथमित्याशङ्क्य चिरं चिन्तयाञ्चकार ।

दक्षा दक्षादयः सर्वे तनया नयवर्त्मनि ॥
अय कथमिवोत्पन्नः चन्दनात्कुटजाङ्कुरः ॥ २० ॥
विस्पष्टं दुष्टसङ्गेन कष्टं भ्रष्टो हि मत्सुतः ॥
न किं मृगमदामोदो हिङ्गुसगेन नश्यति ॥ २१ ॥

तथाभूतानां केषाञ्चित्सङ्गेनैतद्भावं प्राप्तस्यास्य दगौद्धत्येन किमप्याश्चर्यम् ।

काकानां कुरुते नतेन फणिनां दंशेन हिंसाशया
व्याघ्राणामसदाखुतः सुवसनच्छेदेन वित्तः क्षणात् ॥
क्रोडानामथ रक्षसां द्विजवधाद्दुर्वायुना पानतो
दुष्टानामनयादिदुर्गुणचयाद्धा हन्त को विस्मयः ॥२२॥

---

१ भ्रष्टनीतिम् । २ दग्धुमिच्छन् । ३ दृष्ट्युन्मत्तेन ।

अथ वा नैकस्य सर्वाण्यपत्यानि गुणैः समान्येव भवन्तीति विस्मयः ।

कमलासुधासुधाकरहालाहलशंखवारुणीकरिणः
तरुतुरगधेनुभिषगप्सरसः सिन्धोरपत्यानि ॥ २३ ॥

अपि च ।

त एते सूनवः ख्याता नूनं किरणमालिनः ॥
भिषजावश्विनौ शास्ता यमः क्रूरः शनैश्चरः ॥ २४ ॥
पटीयाननघः श्रीमान् वदान्योपीच्यदर्शनः ॥
विनीतस्तनयः पुण्यैरगण्यैरिह लभ्यते ॥ २५ ॥

तदकृतभूरिसुकृतोहमेव किमेतेन शिक्षितेनेति विचारपरवशे मनसि विमनसं ।

सम्बन्धभाषणमुखाकृतिभिः परेषां
जानन्ति हच्चरममध्यमबुद्धिमन्तः ॥
तत्रार्यधीर्भृगुरतः पितुरिङ्गितेन
स्वान्तं प्रचण्डतरकोपवशं बुबोध ॥ २६ ॥

बुद्ध्या पितुस्तेन कृतावमाने हेतुं विनिश्चेतुमलं न सभ्याः ॥
एवं हि गम्भीरतरान्तरास्ते प्रारम्भदुर्ज्ञेयविधेयमार्गाः ॥२७॥

एवं स्वपितरि मुनिरुपदिष्टशान्ते कारुण्यादिसद्गुणाभावमनुभूय ततः स्वौद्धत्यपरिहाराय धातारमनुप्रणमन् सरस्वतीतीरस्थमुनिजनादेशकरोहं न ज्ञेयमुद्गतत्वमित्यनुवेलं विज्ञापयांबभूव । ततः । स निःशेषितकोपपङ्कः पङ्कजासनः सविनयं निजच-

---

१ लक्ष्मीः । २ बृहस्पति. ।

रणप्रणतं भृगुमुत्थाप्य शिशिरतममात्मजालिङ्गनानन्दं क्षणमनुः भूतवान् ।

कर्पूरः स हिमालयः समलयः क्ष्मानन्दनश्चन्दनः
सप्रालेयरविः शुचिप्रवहतां पूरः सरित्पाथसाम् ॥
स प्रातः शिशिरो मरुत्कमलिनीनालं परेपीदृशाः
पुत्रालिङ्गनपथ्यशैत्यनिवहस्यार्हन्ति नैते कलाम् ॥ २८ ॥
लोकोत्तरमस्येदं दाक्ष्यमिति सविस्मयेषु सभ्येषु ॥
निजपितरमनुज्ञाप्य प्रस्थानं चाकरोद्भृगुस्तस्मात् ॥ २९ ॥

इति श्रीमत्सूरीन्द्ररामकृष्णपण्डितविरचितायां भार्गवचम्प्वां तृतीयस्तबकः ॥ ३ ॥

—o—

चतुर्थः स्तबकः ।

ततः कतिपयक्षणैः प्रणतजन्मिजन्मार्जित-
प्रभूतदुरितद्रुमक्षयदवस्य गौरीपतेः ॥
शिलोच्चयमगाद्भृतं द्रुहिणसुनुरुत्संसर-
त्समीरणरयाधिकप्रबललोललोलागतिः ॥ १ ॥

ततो विदूरे पुर एव पुरारिगिरिमपश्यत् ।

स्वर्गङ्गोदकफेनपारदसुधाकुन्देन्दुमुक्तास्फुर-
द्विद्युन्निर्झरधेनुनिर्मलपयःकर्पूरकम्बुप्रभाम् ॥
मुष्णन्युच्चतरेण कान्तिपटलेनात्युन्नतो राजते
कैलासः सुरधुर्यधूर्जटियशःसंघात एव ध्रुवम् ॥ २ ॥

यत्र ।

नोल्लासः पङ्कजानामविकसनमथो नैवामिन्दीवराणां
योगः कोकाङ्गनानामभिमतिरनिशं कामिनीनां न यस्मिन्॥
तापः सचारभाजां रविकरनिकरान्नेन्दुगीयूषभाजां
क्षुद्बोधश्चाण्डजानां त्रिपुरहरशिरश्चन्द्रिकासन्निधानात् १
गौरीकर्पूरगौरोरगतुहिनकरोक्षादिभिः क्षीरगौरै-
र्ह्रग्दोषान्ताय चात्तं नयनगलफणामध्यमुष्केषु नैल्यम् ॥
नूनं तस्मादिनाच्छस्फटिकमणिशिलाजालशाली स शैलः
प्रावृण्मेघानुकारिद्युतिभरमधुरान्सिन्धुरान्संदधार ॥ ४ ॥

इतो बकुलमण्डलं नवतमालमालामितः
कदम्बपटलीमितस्तिलकतालसन्धानितः ॥
इतश्च कदलीरितो विबुधपादपानां कुलं
पुपोष महतामहोच्छ्रितजनेनुकम्पाभरः ॥ ५ ॥

इति कौतूहलाञ्चितचित्तः स द्विजः क्षणमवलोकयांचक्रे । तस्मिन्ननवरतवसन्तावतारविस्फारितनवकिसलयकुसुमभराभुग्नबन्धुरस्कन्धतरुसमारूढकलकण्ठकण्ठध्वानिप्रतिध्वानवति । अत्युच्चतरतरुशिखरारूढकिन्नरमिथुनषड्जादिस्वरगीयमानमहेशयशःपीयूषमधुरिमाणमास्वाधानन्दसन्दोहपरवशतया विगलितस्मृतिः क्षणं बभ्राम । ततः कार्यवशादाप्तस्मृतिर्भृगुः । हरचरणराजीवा-

---

१ सूर्यकान्तमणि–प्रफुल्लितः । २ बन्धुरो वृक्षविशेषः (सापल्याचे झाड)।

लोकनोत्कण्ठितस्वान्तैर्विबुधविद्याधरतापसादिभिरनिशमभ्यस्तया पदव्या श्रीमन्महेशद्वारप्रदेशमासससाद ।

भ्रमद्भ्रुकुटिविभ्रमद्विकटचण्डदण्डायुध-
प्रचण्डभटमण्डलीभुजभुजङ्गभङ्गक्षमैः ॥
तुषारगिरिगौरवैः प्रथमयूथनाथाधिपैः
सुगुप्तमनिशं निशाकरकलावतंसानुगैः ॥ ६ ॥

तत्र । निजनाथस्य शिवस्य अनुजन्मा कनिष्ठभ्राता अयं भृगुः पूर्वं रुद्रो भृगुरप्यनन्तरं ब्रह्मणः पुत्रोयामिति सविनयं नमद्भिः प्रमथगणैरनिवारित एव प्रविवेश ।

वारणशतानि विप्रैः प्राप्यन्ते क्षुद्रभूपतेर्द्वारे ॥
द्वारे धनदपतेरपि नैकमपि प्राप वारणं[1] स भृगुः ॥ ७ ॥

अथ चपलपदं सदःसन्निधिं स विधिसुतः समासाद्य अतर्कितकार्यविधानदक्षः शोणाक्षिकोणेन क्षणमपश्यत् यस्मिंस्तत्त्वावमर्शहर्षिततनूरुहैः सनकादिसिद्धसमूहैरनुक्षणमुपास्यमानः स भगवान् भवः सततमास्ते ।

गौरवं गीयते तस्य विमन्यैर्जगतां गुरोः ॥
सद्योजातोपि यः प्राचामाचार्यपदवीं गतः ॥ ८ ॥
क्व नारीपीनोरःप्रभवपरिरम्भव्यतिकरः
क्व शून्यव्यामोहव्यसनततिरात्मन्याभिरतिः ॥
तयोरेकत्रैव स्थितिमपि निसर्गाद्विघमयोः
सदान्यस्तासूयं घटयितुमलं कस्तदपरः ॥ ९ ॥

---

१ वारण हस्ती निवृत्तिः ।

यस्याद्भुतं चरित्रम् । यः सकललोकभवभयसंहरणोपि भव भीमश्च सर्वामरमौलिस्थलीव्युप्तचिन्तामणिरपि कपर्दी । जगन्नि वासोपि श्मशानवासः सर्वजगदन्धःप्रदोपि भिक्षाशनः । जग त्प्रावरणोपि कौपीनधरः । दिक्पालार्पितश्रीरप्यकिंचनः । अ हो मित्रपदवीं प्राप्तः कुबेरोप्येतत्प्रसादनात् विपुलसम्पदरो लोकेकृतघ्नतानिर्भयत्वेनास्य किंचनत्वं कथमुपेक्षते ।

कौपीनेन्दुकपालकृत्तिभसिते प्रेतास्थिमालाविष-
व्यालालङ्करणस्य सद्वयपतेरर्धाङ्गजायाकृतेः ॥
दारिद्र्यं दधतः श्मशानवसतेर्यद्ध्यकेशः सखा
ख्यातोसौ धनदो मुधा बुधजनैर्यो नाभिजातः खलु॥१०

अत्र कारणमेतदेवेत्यवगम्यते ।

लोके यत्किल वैभवं तदखिलं गौरीशकारुण्यतो
निःस्वत्वे खलु तस्य कारणमदः शङ्केहमेकं पुनः ॥
यक्षाक्रान्तधना हि यान्ति धनिनो नैःस्वं तु यक्षाधिपः
कोशो यस्य सदाधितिष्ठति न किंयास्यत्यसौ निःस्वताम् ११

स इत्थं सभोपान्ते तिष्ठन् स्वान्ते एव सविस्मयं तर्कयामास ततो भगवानपि चिरादुपगतमात्मबन्धुमवलोक्य सोत्कण्ठम् ।

उत्सङ्गाच्छैलकन्यां त्वरितमपनयन्बन्धुविश्लेषदुःखं
स्वान्तादुत्कृत्य पीठात्त्वरितमथ सुहृत्स्नेहपाशाविव द्वौ ॥
दोर्दण्डौ सम्प्रसार्य प्रसभपदगतिः स्नेहविच्छिन्नचेता
आश्लेषार्थं समायाद्गुरुमविधमहो मोहपाशो बलीयान् ॥१२॥

---

१ व्युप्त 'ङुवप् बीजसताने'क्त. । २ कपर्दो जटाजूट. 'कवडी'। ३ अन्धः अन्नम् । ५ कुबेरः ।

इत्थं नीलकण्ठं निजोपकण्ठं समागतमवेक्ष्य सतिरस्कारं भृगु-रवोचत् । श्रूयतामनभिज्ञ ।

स्फुटं प्रीतिर्लोके समगुणवतामेव सुभगा
क्व ते शीलं भूषा चरितमथ वासः क्व च मम ॥
न मां स्प्रष्टुं योग्यः किमुत परिरब्धुं त्वमशुचिः
समीहे सम्बन्धं न तव भव दूरीभव जवात् ॥ १३ ॥

किंच ।

चिताभसितभूषितं विगतशौचमाभीषणं
कपालवदशोभनं शववितण्डमुण्डस्रजा ॥
श्मशाममिव ते वपुर्यदनवेक्षणीयं सदा
सदाचरणशालिनः किल न रन्तुमस्मिन् क्षमः ॥ १४ ॥

एवमखिलश्रुतिनिकरसंस्तुतपदपङ्कजः शङ्करः अकारणं दुरुक्तस्तुदन्तं भृगुं शोणायमानदृक्कोणेनावलोक्य ।

कोपाटोपावधूतभ्रुकुटितटभवद्दान्तसम्पातदीप्य-
ज्वालस्थोदग्रवह्निप्रसरदुरुतरज्वालमालावलीढम् ॥
ब्रह्माण्डं संविधित्सन्निव पवनगतिर्वाडवं हन्तुमुच्चै-
रुद्यम्योद्दामशूलं प्रमथपतिरगादाशु वीतानुरागः ॥ १५ ॥

तं प्रत्यतिपरुषतरमभाषत ।

---

१ अशुद्धम् । २ कुम्भशकलयुक्त पक्षे भिक्षापात्र(परळ)युक्तम् । ३ सस्तुतपादकमल· । ४ क्रोधेवेशेनावधूत यद्भ्रुकुटितट तन्मध्ये उत्पन्नः दान्त-सम्पातो दमितवेगो भालस्थ. प्रचण्डः वह्निस्तृतीयनेत्रानलः तस्य प्रसरन्त्यः उरुतरा अतिशयेन ज्वालमालाः ज्वालासमूहाः तेनावलीढ व्याप्तम । ५ दग्धुमिच्छन् । ६ शिव. ।

सत्त्वान्नपीवरनितम्ब कथं बतासि
त्वं नित्यहोमभवधूमविधूसराक्षः ॥
किं मर्तुकाम इव जल्पसि मामनल्पं
शूलाहतस्त्यज कुलायमिद मदग्रे ॥ १६ ॥

एवं भगवतः खण्डपरशोरकाण्डविध्यण्डभङ्गशङ्कांशंसिनृशंस रोषभीषणानलज्वालावलिषु पतङ्गायितमात्मानमवेक्ष्य स भृगुर्द्रुमद्रात्रः सरभसमभयलम्भनाय श्रीशम्भुसम्भावनीयसौभाग्यभुवं भवानीं संस्तवैरदम्भं सम्भावयामास ।

सरम्भसतरसरवाच्चण्डदोर्दण्डसन्मण्डलाकृष्टकोदण्डदण्डाग्र निर्मुक्तनालीकरंहस्त्रसद्व्यस्तशस्त्रासुरस्तोमसम्भावितोदारपादाम्बुजे प्रमथितजगदण्डवेतण्डदण्डायुधक्काधावस्फूर्जितप्रोद्भवद्भीतिविभ्य च्छताधिप्रशान्तिक्षमोदारकीर्तीन्दुभूरिप्रभापूरिताशेषदिग्मण्डले । प्रचलदमलकर्णताटङ्ककोपान्तरुद्भासमद्दीरकोरुच्छदच्छप्रभाचक्र वालस्फुटोदारसञ्चारलीलाभिभूतोदितोद्भासिभास्वत्तिरश्चांशुतिग्मप्रभे । प्र कुपितशिनकोपसम्प्रच्यवद्भूरिदानादयानागदर्पान्धगन्धद्विपालान संदर्शने पाहि मामद्य भूताधिपोद्दामदूरं जगद्धात्रि तुभ्य नमः ॥ १७ ॥

तदानीमनुकम्पया तदवनाय ।
दरद्योतोदारप्रहसितगुणाकृष्टपुरजि-
न्मनोमीनामानापनयनविधौ व्यग्रमनसा ॥

---

१ कुलाय जीवन्धानं देहामिति यावत् । २ नालीका बाणाः । ३ हस्ति बन्धनस्तम्भ. । ४ दरः शखस्तस्य द्योत इव उदार प्रहसित हास्यम् ।

सदा भाव्यं यस्याः प्रमथपतिना प्रादुरभव-
च्छिवा साक्षाद्दक्षान्धकदमनकोपप्रशमने ॥ १८ ॥
क्रोधोद्धतान्धकसपत्नविरञ्चिसून्वो-
र्मध्ये रराज गिरिराजसुता नतभ्रूः ॥
लोकत्रयान्तकरमृत्युमुमूर्षुमध्ये
दिव्या जरामृतिहराऽमृतवल्लरीव ॥ १९ ॥

अत्रान्तरे ।

प्रदोषप्रारम्भे दरविकसदिन्दीवरदलो-
ल्लसल्लीलालास्याद्भुतिपटुरपाङ्गो नगभुवः ॥
भृगोर्भ्रश्यद्धुद्धेर्भयमपनयन्नाविरभव-
द्भृशं कोपाविष्टं शमनशमितारं च शमयन् ॥ २० ॥

तदानीम् ।

प्रभवति मत्प्रतिघातादनिशमसाविति समत्सरमनङ्गः ॥
दुर्गापाङ्गसहायः कोपान्ते शिवमनस्यथाविरभूत् ॥२१॥

ततः पञ्चेषुशरवञ्चितकुरङ्गमनङ्गरिपुमवगम्य विरञ्चिसुताच-
पलतरसञ्चलदङ्गुलिकसंचारसञ्चालितवीणागुणनिचयसम्भूतगम्भी-
रमधुरस्वरमाधुरीविडम्बनपटुतरेण सविनयमिदमूचेऽचलकन्या ।

अविदितपरिणामः कर्मणामप्रवीणः
प्रवणमतिरथास्ते तेष्वदस्तावदास्ताम् ॥
त्वमसि विदिततत्त्वो दुष्कलस्यास्य कस्माद्
द्विजमनुजमिमं ते देवरं मेभिहंसि ॥ २२ ॥

---

१ अन्धकसपत्नः शङ्करः । २ प्रवणमतिः नम्रमतिः । ३ ब्रह्मण. सकाशाद्रुद्रस्य भृगोश्चोत्पत्तिरतः पार्वत्या भृगौ देवरत्वम् ।

इति तुहिनगिरीन्द्रकन्यकास्यप्रवचनपाशनिबद्धहृद्विहङ्गे ॥
गतवति शममीश्वरे स सद्यश्चपलपदमपासरदस्य दृष्टिपातात् २१

कुपितमृगेन्द्रमुखादिव प्रमुक्त
श्चकितविलोलविलोचनः कुरङ्गः ॥
चपलपदं तमसः परं पुरस्ता-
त्सभृगुरगारमगादघान्तकस्य ॥ २४ ॥

इति श्रीमन्सूरीन्द्ररामकृष्णपण्डितविरचितायां भार्गवचम्प्वां चतुर्थस्तवकः ॥ ४ ॥

—०:०—

पञ्चमस्तबकः ।

ततोऽध्वनि गच्छन् भृगुः सहर्षम् । अहो मुनिवराशीर्वचनकवचेनैवाद्य संरक्षितोस्मीति वदन्नकस्मादेव पुरस्तेजसां राशिमपश्यत् । किमेतादिति तत्र सादरं दृष्टिं प्रसार्य श्रीरमणचरणपरिचरणावाप्तसालोक्यानां महाभागवतानां शरत्किरणमालिमण्डलोज्ज्वलप्रभैरनेकैः समानैरापि विमानैः सर्वतः परिवृतं श्रीमद्वैकुण्ठाख्यं लोकं ददर्श ।

मग्ना येतितरां पुरामपुनरावृत्त्यै पुराणैः स्तुतः
श्रीशो यच्छरदिन्दुसुन्दरयशःपीयूषवारांनिधौ ॥

---

१ श्री विष्णोः । २ समानाकृतिभिः । ३ विमानैः यानैः । ४ पुराणपुरुषः श्रीविष्णुः ।

Department of
BANSTH
(Deemed University)

ते मायापटलं व्युदस्य विगलत्सापत्न्यायाः सवतो
वैकुण्ठं खलु यान्ति नैवमपरे सारैतरैः साधनैः ॥ १ ॥

किंच ।

नमन्नमुचिसूदनस्फुरदुदारमौल्युल्लस-
न्मणिप्रकरसंवलद्धहलकान्तिनीराजिते ॥
हरेः पदसरोरुहे रतिभृतां न भूयो भवो-
द्भवो भुवि भवान्तकृद्भुवनभाग्यभाजां सताम् ॥ २ ॥

अपि च ।

यस्याः शोभनशोणकूणितचलद्भृक्कोणनैसर्गिक-
श्लक्ष्णापाङ्गतरङ्गितेक्षणकृते यक्षेन्द्रदक्षादिभिः ॥
तप्यन्ते नितरामुरीकृतमहायत्नैर्यदावासतः
सा श्रीराश्रयते श्रियं श्रितनुतां लोकः स कैः स्तूयते ॥३॥
यत्रत्याः पशुपक्षिणोऽपि नितरामानन्दचिन्मूर्तयः
सर्वे शर्ववदुर्वनुग्रहजुषः क्षीरोदकन्यापतेः ॥
धन्यं तद्धि पशुत्वमेव महतां शोच्य न यत्संमतः
श्रीशानुग्रहभाजनं तदितरव्यर्थं सुरत्वं दिवि ॥ ४ ॥
वैचित्र्यात्कर्मणां यत्र वैजात्य नैव जन्मिनाम् ॥
नूनं मनोविनोदाय श्रिय. कान्तेन कल्पितम् ॥ ५ ॥

अपि च ।

यत्राराममुरम्यसीमविलसत्कासारतीराश्रितो
हंसीभिः स्मरदीपदीपनवरैर्भावैरपि भ्रामितः ॥

---

१ भक्तिचारकाणाम् । २ भवोद्भवः जन्मप्राप्तिः ।

हंसः कंसनिषूदनस्य यशसा मालापमालामिव
श्रुत्वोद्यत्कलकण्ठकण्ठनिनदं तत्याज रत्यादरम् ॥ ६ ॥
अधरीकृतामरीजनगानझरीमाधुरीधुरीणापि ॥
हरिचरणशरणमनसां न मनःक्षोभाय मधुकरी गीतिः ॥७॥

अपि च ।

प्रोन्मीलन्नवपुष्पपल्लवफलोदारर्द्धिभारानतै-
रर्थिप्रार्थितकिंचिदर्थनिवहाधिक्यप्रदैः पादपैः ॥
स्वच्छा या सुविहारधीरमनसामस्तप्ररोहं पुन-
र्यत्राकारि मनोभिवाञ्छितफलासिद्धेरभावः सदा ॥८॥
आँवाणो मणयो यत्र धेनवः कामधेनवः ॥
तरवः कल्पतरवो नराः श्रीशाः स्त्रियः श्रियः ॥ ९ ॥

स तस्मिन्नजान्मजः सुविशुद्धसुधामधवलिमाधरीकरणपटुसिद्धसौधावलीमध्यविन्यस्तशस्ताध्वना अतिविमलकान्तिकान्ताजनसहचरसिद्धगणगीयमानानवद्यशाः संशृण्वन् नमद्वृन्दारकवृन्दसंमदसञ्चलन्मौलिसंघविगलदनेकरत्नावलीसैकताचित्तं श्रीपतेर्द्वारप्रदेशमाससाद ।

द्वारे हीरप्रवराकिरणोद्योतिते वारणौघ-
व्याप्ते श्रीपत्यनुचरवराधिष्ठितेपि द्विजाग्र्यः ॥
चित्रं लेभ श्रुतिविदपि नो वारणं तत्र हेतु-
र्यस्मिन्नित्यं निवसति विभुर्वारणोद्धारदक्षः ॥ १० ॥

---

१ कृष्णस्य । २ पक्षिशब्दम् । ३ अप्सरआदि । ४ 'धुरीणा अग्रस्थानास्थिता । ५ भृङ्गगुञ्जारवः । ६ शिलाः । ७ हस्तिसमुदायव्याप्ते पक्षे वारणमन्तर्गमन निषेधः । ८ गजेन्द्रमोक्षकर्तेत्यर्थः ।

तत्र सम्प्राप्तोऽनिवारितप्रवेशः स विप्रः क्षिप्रमन्तर्मनमा-विवेश ।

प्रभूताकिरणावलीलसदनेकरत्नोपलैः
स्फुट घटितकुट्टिमं चतुरदूतसंवाष्टितम् ॥
तदङ्गणमतीत्य स त्वरितमाविवेशाग्रतः
प्रभोः शयनशालिकानिकटमुत्कटोत्कण्ठया ॥११॥

तत्रानेकशतमणिमयस्तम्भराजिविराजितान्तरालां रुक्मम-यकुड्यसंव्युत्प्रदीपमणिदीपांशुजालविदलितनिःशेषतिमिरोपरोधां-गवाक्षरन्ध्रनिर्गतसुरभिधूपामोदसुरभितहरिदन्तरालां । सुविशा-लां शयनशालां प्रविश्यापश्यत् ।

पर्यङ्के सुरधेनुनिर्मलपयःफेनायमानोन्नम-
त्प्रोद्यत्कान्तमदुरच्छदवाते प्रत्यापदलक्षणः ॥
पद्मालोलकरोपलालितपदः प्रद्योतमानः प्रभुः
शेते शर्वसरोरुहोद्भवमरुद्गीर्वाणनाथस्तुतः ॥ १२ ॥

तथाभूतं तमवलोक्य रुष्टो मुनेः । अहो कष्टमैश्वर्यमदपुष्टो-यं धृष्टतया स्पष्टमस्मद्विधगरिष्ठागमनेऽपि नष्टवदभद्रां निद्रामनु-भवति ।

गृहमागतवति पूज्ये सुविनयमद्धर्मतत्परैर्मनुजैः ॥
प्रत्युत्थानादिविधर्नूनमनुष्ठीयत न मदमत्तैः ॥ १३ ॥
विद्याभिजनजन्मोजारूपयौवनबुद्धिजा· ॥
मदाः सर्वेऽपि नार्हन्ति श्रीमदस्य कलामपि ॥ १४ ॥

---

१ सुवासीकृतदिशामध्यम् ।२ शर्व. शिवः । सरोरुहोद्भवो ब्रह्मा । मरुतः । गीर्वाणनाथ इन्द्रः । ३ ऐश्वर्यमदोन्मत्तः ।

एवं मत्वा विवृतनयनः सञ्चलद्वन्तवासा-
रोषावेशाकलितमनसा निःश्वसन्नर्तितभ्रूः ॥
धावन्नुच्चः सरभसमहो श्रीमनोहारिविप्रः
श्रीशस्योरःसबलमघृणः स्वाङ्घ्रिणा संततार्ड ॥ १५ ॥

ततः प्रबुद्धो भगवान् ब्रह्मण्याङ्घ्रणीः करुणापीयूषरसपूरित-स्वान्तः स्वान्तिके प्रान्तारक्तनयनमम्भोजंभूतनयनमवेक्ष्य तत्कृतासत्कृतासत्कृतिमविचिन्त्य निगमागमपारावारपरिशीलनेद्धोच्छदच्छमतिविभवमहानुभावबुद्धिसिद्धान्ततापवर्गप्रदविप्रानुवृत्तिरूपसद्धर्मं जनसंग्रहार्थं स्वयमाचरन् चपलपदं पर्यङ्कादुत्तीर्य सविनयमवैनिसुरचरणकमलमुपसृत्य नमयाञ्चकार ।

पर्यङ्कोपर्युपावेश्य द्विजवर्यं तमार्यधीः ॥
सुरवर्यः समर्यादमुदार वक्तुमुद्यतः ॥ १६ ॥
धन्योह कृतकृत्यतामुपगतस्त्वत्पादसंदर्शनं
जातं मेतिचिरार्जितोरुसुकृतादद्यानवद्या जनिः ॥
किंवा दुष्कृतमास्ति यन्निकृतवान्प्रत्युद्गमप्रश्रय-
प्रत्युत्थाननमस्कृतीश्च कुशलप्रश्नं च तत्क्षम्यताम् ॥१७॥
चरितैतागस्यनाभिज्ञे कुप्यति न दीनवत्सलाः सन्तः ॥
श्वासं विनैकमद्धा निद्रितमृतयोश्च कः पुनः पिशुनः॥ १८॥
प्रभूतदुरितावलीविदलिताघ रो दौर्भगं
प्रणष्टभवज्जगत्यतुलकीर्तिरत्युज्ज्वलः ॥

---

१ स्वसमीपे । २ ब्रह्मणः पुत्रम् । ३ ब्राह्मणपादकमलम् । ४ जन्म । ५ कृताराधे ।

जगत्त्रितयपावनो भुवनपालनाविर्भव-
द्बलस्तदखिलं भवच्चरणपद्मसंस्पर्शनात् ॥ १९ ॥

किं च ।

भवेदाशीर्वचनाज्जरया प्रतिमुक्तनव्यपदकमला ॥
चपलापि नैव मुञ्चति कमला मां तदनुरागहीनमपि॥२०॥
छायेवातिचला रमा कथमहं कुर्यां पुराणः पुमाने-
तस्याः परिपालनं क्षिति परा चिन्ता ममाऽसत्पुरा ॥
अद्य त्वत्पदमुद्रया तदवने दुर्मेद्यया शक्तया
संवृत्तोस्मि गतज्वरोत्र किमहं प्रत्यर्पये भो तव ॥ २१ ॥

किंच ।

मया प्राप्तं युष्माद्विधविबुधभूदेवचरण-
प्रसादाद्वैकुण्ठाद्यखिलबृहदैश्वर्यमतुलम् ॥
अतः सर्वस्वस्याप्यहमहह विश्राणनविधौ[1]
भवेयं किंवालं किल समुपकर्तुं च भवताम् ॥ २२ ॥

अपि च ।

सुजातसरसीरुहान्तरदलान्तसन्मार्दवा-
धरीकरणपञ्चमं चरणपङ्कजातं तव ॥
स्वभावपविनिष्ठुरं प्रबलदानवेन्द्रायुध-
प्रघट्टनपतस्किणप्रकरशालिवक्षो मम ॥ २३ ॥

तदेतन्मदुत्वेनातिदूनं ते मदायेति नितान्तचिन्ताचित्तस्य मे मानसं दुनोतीति प्रत्युत सोच्युतस्तत्पदमङ्के निधाय शान्तमेन[3] स्वपाणिना सशङ्कं पस्पर्श । नूनमत्र ।

---

१ दानविधौ । २ पर्ववज्रम् । ३ कल्याणतमेन ।

न प्रायो निःश्रीके श्रीस्पर्शिन्येव सेवनीयत्वम् ॥

हरिरप्यतः सिषेवे स्वस्योरसि रमाभिमृष्टपदम् ॥ २४ ॥

स्पर्शमणिर्निजघातुकमपि सदयमयोऽपि हेमतां नयति ॥

हरिरुत्सङ्ग सगुणा द्विजपदमपि सेव्यतां तथा कमला॥ २५ ॥

किंच ।

हरेरुरसि संस्थितामपि निजघ्निवानिन्दिरां

पदा भृगुरतिस्फुटं विरतिमत्त्वमस्याद्भुतम् ॥

ध्रुवं ननु तदादिकं द्विजपदापलग्नेव सा-

वतिष्ठति न तत्करेऽपि सुचिरं प्रयत्नार्जिता ॥ २६ ॥

ततः पुनः सवितर्कं भगवानाह । अहो बत तमोमुद्रया निद्रयाद्य मुषितोऽस्मि ।

अभद्रेयं निद्रा बत बललतामिस्रपदवीं

बलद्वालाबालानपि विपुलमोहं वितनुते ॥

तदेनां देवो वा न खलु मनुजो वातिविभृया-

द्भ्रमाबिभ्रन्भ्रष्टो भवति सुकृतेभ्यस्त्वहमिव ॥ २७ ॥

पुनः सविनयम् ।

भो विद्वन्कुरु मय्यनुग्रहमिह प्राप्तोऽसि कस्माद्भृतं

तत्कार्यं वद साधये महदपि प्राणेन चार्थेन च ॥

वैकुण्ठं प्रपुनीहि पादरजसा विप्रारतु मद्दैवतं

जीवाम्येष तदर्थमेव भवतां दासोऽस्मि निष्कैतवः ॥२८॥

इत्येवम् ।

---

१ अयःलोहम् । २ बालाबालान् बालान्वृद्धांस्तरुणानपि । ३ निष्कपट' ।

मधुरपदध्वनिलालितां कलितसुवर्णामलंकृतां सरलाम् ।
ब्राह्मीमनवद्यगुणां गिरमवदन्मनोहरां श्रीशः ॥ २९ ॥

ततो ब्रह्मण्यदेवस्य श्रीपतेः प्रसन्नमुखराकासुधाकरकरोपनिष्यन्दनातिमधुरवाक्सुधाझरीसुरसमास्वाद्यापि द्विजचित्तचकोरस्तृष्णान्तं न जगाम ।

प्रमोदादुत्तिष्ठद्विपुलपुलकालंकृतवपुः-
कलोन्मीलच्चक्षुर्विमलगलदानन्दसलिलः ॥
पृथुप्रेमोद्गाराकलितहृदयो गद्गदगलः
क्षणं तूष्णीमासीद्भृगुरुचितवामक्षमतया ॥ ३० ॥

ततः समाविर्भवत्प्रेमरसप्रसरपरवशं मानसं कृच्छ्रात्संस्तभ्य प्रभूतानन्दसन्दोहोद्भवद्भूर्यश्रुधारापिनद्धाक्षिणी प्रमृज्य श्रीमद्भगवतो वैकुण्ठपतेरकलङ्कमुखशशाङ्के दत्तचक्षुर्बद्धाञ्जलिर्भृगुः ।

वक्तव्यं किमु कञ्जनाभ यदहं निर्हेतुकं[2] ते रमा-
वासे वक्षसि साहसादकरवं हन्तावघातं पदा ॥
तन्मे सन्ततिदुष्कृतं न गणयन् यद्वन्दसे क्षम्यतां
दासोस्मीति वदन् कृपांजलनिधे ह्येतत्तवैवोचितम् ॥२१॥

अहो आश्चर्यमकारणकृतापराधितया परिवादार्हमपि मां स्तौषि यतः ।

स्तव्यताव्यक्तमव्यस्ता व्याप्ता गुर्वनुवर्तिभिः ॥
पदा पितामहं[3] हत्वा पितामहमगां कथम् ॥ २२ ॥

---

१ कमलनाभ । २ निन्दायोग्यम् । ३ भृगोः पितामहो विष्णुः ।

सर्वागर्वसुपर्वशर्वबलभिद्दुर्वादिकव्यादिभि-
र्दिव्यश्राव्यसुकाव्यनव्यकृतिभिर्यस्तूयसे सर्वदा ॥
स त्वं सत्त्वनिधेसि किं मम पदस्पर्शात्कृतार्थः परं
ज्ञातं धर्मभृता त्वयाद्य महता ब्रह्मण्यताविष्कृता ॥३३॥
स्वेनावासमसमस्तनिरतुलगुणग्रामोसि किं वाददे
त्वामाशीर्वचनं तथापि सरिते[1] देयं यथा तज्जलम् ॥
स्वस्त्यस्तु द्विजभक्तिरस्तु भवते श्रीरस्तु वास्तु क्षमा
वीर्यं धैर्यमपारमस्तु विजयः शान्तिर्यशोऽस्त्वस्तु शम् ३४
भो सङ्कल्पजनैकवत्सल जगद्धातर्धरोद्धारक
श्रीश स्वाश्रितकामपूर करुणापीयूषपाथोनिधे ॥
मामागस्कृतमद्य पाहि करुणापाङ्गेन येन त्वयाऽ-
द्यब्रह्मण्यकरीन्द्रमूर्धसु कृतं शार्दूलविक्रीडितम् ॥३५॥
मयि कुरु कृपावलोकं करुणाकर मामकोयमिति बुद्ध्या ॥
उचितं वाक्यमपरं मामनुजानीहि मापते यामि ॥ ३६ ॥

ततः सरस्वतीरोधसि तापससमूहसन्निदेशवशादागतेन मया भवत्प्रसादात्कृतकार्यत्वमवासम् । इति पुरुषोत्तममनुज्ञाप्य शिरसा तच्चरणावभिवाद्य तं प्रदक्षिणीकृत्य समुदयानुरागाकलितचित्तः स विप्रः क्षिप्रतरं ययतरथे ।

इति श्रीमत्सूरीन्द्ररामकृष्णपण्डितविरचितायां भार्गवचम्प्वां पञ्चमःस्तबकः ॥ ५ ॥

---

१ सरिते नद्यै । २ ऋषिसङ्घाज्ञया । ३ सम्यगुदितप्रीतिव्याप्तमनाः ।

अथो विष्णुपदमेवैकं सेव्यमिति गाढमतिर्भृगुः विष्णुपदात्प्रस्थितोपि विष्णुपदाध्वना विष्णुपदानुरक्तान्मुनिजनानाभिनन्दयितुं भगवत्याः सरस्वत्यास्तीरमाजगाम ।

सोत्कण्ठनीलकण्ठोपकण्ठे मेघोदयो यथा ॥
तथा प्रादुरभूत्तेषामग्रेऽव्यग्रमतिर्भृगुः ॥ १ ॥

महर्षिभिश्च सानन्दगतिमुखप्रसृतिभ्यां कृतार्थोऽयमागत इत्यनुमितस्तानभिवाद्य तदुपदिष्टसुशासननिर्वाहकृदपि कुशासनं भेजे-

ततः सत्कृत्य मुनिभिः पृष्टस्तात यथा त्वया ॥
यद्यत्समनुभूत तद्वदस्व मुनिसंसदि ॥ २ ॥

तन्निशम्य सहर्ष भृगुरवोचत् भवतां भगवतामाज्ञयाहं प्रथमं पारमेष्ठ्यपदं गतवान् । तत्र सदस्यकृतप्रणतिस्तुतिमुपविष्टं मामवलोक्य कुपितात्पितुः सकाशाद् मद्रक्षणे पुत्रस्नेह एवालं बभूव । ततः कैलासेपि मामागतमवलोक्य बन्धुस्नेहात् परिरब्धुमुपागतो महुर्वचनक्षुभितमना रुद्रः शूलेन मां हन्तुं दुद्राव ।

बन्धुस्नेहः सुतस्नेहस्तयोर्मध्ये परो बली ॥
पूर्वोपकृत्या नश्येत द्वितीयो न कदाचन ॥ २ ॥

तदातित्रस्तेन मया प्रार्थितया देव्या आगत्य कथञ्चिदहं विमोचितो वैकुण्ठं गत्वा प्रभोः शयनशालां प्रविश्य महान्तमनयमाकर्षामीति साश्रुपातम् ।

---

१ सुशासन सम्यगाज्ञा । २ कुशासनं विष्टरं (कुशानां दर्भाणा मासनम्) । ३ ब्रह्मदेवस्थानम् । ४ अपकारेण ।

सुप्तं न प्रतिबोधयेदिति विधिं धिक्कृत्य मोहान्मृदु
श्लक्ष्णं पद्मकराधिवासितमुरः सुप्तस्य पत्युः श्रियः ॥
कष्टं निष्करुणं पदाभिहतवांस्तत्रापि शान्तिद्रुमो
यामूचे प्रतिबुध्य वाचमुचितां वक्तुं न सा शक्यते ॥४॥

तदा समुच्छलत्प्रेमभराकलितचित्ततया मयाप्युक्तम् ।

भो संवित्सुखशेवधे गुणनिधे सद्योगिहृत्सान्निधे
कारुण्यामृतवारिधे भवभयत्राणाय दत्तावधे ॥
सापघ्नामलनामधेयभजतां दुःखैणसत्पारधे
मय्यद्धा विनिधेहि हन्त करुणां मोहं पिधेहि द्रुतम् ५

करुणाजलदस्य तस्य श्रीनिवासस्य किं किं वर्णनीयम् ।

सा शान्तिः सविशुद्धभाग्यमहिमा स प्रौढिमा सा मतिः
सा सद्ब्राह्मवभक्तिरद्भुतनयः सप्रश्रयः सा कृपा ॥
सप्रेमप्रसरः सुधामधुरिमाद्वाराक्षरालंकृता
सा वाग्यत्स्मृतिमात्रतः स पुलकप्रेमाश्रुपातो मम ॥ ६ ॥

तस्मात् ।

किं देवैर्दिवि दिव्यसम्पदि पदभ्रंशैकचिन्ताकुलैः
किं वा सृष्टिविधानदीनमनसा पित्रा विधात्रा मम ॥
धूलिव्यालकपालशूलगरलाद्यग्रेण रुद्रेण वा
सेव्यः सर्वजनैः कृपाजलनिधिर्वैकुण्ठनाथो हरिः ॥ ७ ॥

किंच ।

---

१ दुःखरूप एणो मृगः तस्य पाराधिं मृगयाकारी । २ सद्ब्राह्मणभक्तिः ।

वागक्षिश्रुतिहस्तमस्तकमदस्वान्तं प्रशान्तात्मना
पुंसात्यन्तहिताय विष्णुभजने योज्यं त्वदम्भं क्रमात् ॥
तल्लीलाकथने तदीक्षणविधौ तत्कीर्तने तच्छुभा-
र्चायां तत्र नमस्तदालयगतौ तच्चिन्तनेहर्निशम् ॥ ८ ॥

अपि च ।

ध्रुवो ध्रुवपदाधिपः शिशुरकारि दन्तावलः[1]
स्वपार्षदसदश्वरः प्रकृतिवक्रनक्रार्दितः ॥
परागसि कृते जरोपि दिवि निर्जरो येन तं[2]-
त्किमन्यकृपणार्जनात्सकरुणाद्य नः सेव्यताम् ॥ ९ ॥

किं च ।

कुरङ्गोयमिति भ्रान्त्या व्याधो विव्याध तत्पदम् ॥
मत्यैवाहमसद्वृत्तः पदोरः समताडयम् ॥ १० ॥

तस्माद् व्याधादप्यतिक्रूरकर्माणमपि मां यः स्तुतिपात्रं चकार । तस्मिन् शान्त्येकधाम्नि करुणापारावारे दीनवत्सले हरौ सेव्ये सति ये केवलमुदारार्थमेव धनमदान्धीकृतकृपणधनिकानुपासते तेतीव मन्दाः अहो कष्टं वृत्तं कृपणानाम् ।

प्राणादपि परो येषामर्थोऽनर्थावहश्चलः ॥
तदर्थं हन्त संत्यक्तं पुमर्थत्रयमर्थपैः[3] ॥ ११ ॥

पश्यन्त्वार्यास्तावत् ।

भो भो याचक दुर्गतद्रुपरशो कष्टं नकारा इमे
त्वद्गेहे कति सन्ति तत्कथय मे तस्मिन्महान्विस्मयः ॥

---

१ दन्तावलो गजेन्द्रः २ एतन्नामा व्याधः । ३ धर्मार्थकाममोक्षात् । ४ वित्तपालकैः ।

बाल्यात्तद्व्ययकारके त्वयि पुनस्त्वद्यापि नाभूत्क्षयः
किं जानासि न मूढ सोव्ययपदं प्राप्तस्तदन्तः कथम् ॥१२॥

अन्यच्च ।

गतदशनं वदनं ते तदपि कथं वदति नेति चित्रपदम् ॥
अर्थिन्किमत्र चित्रं तन्न रसनवत्त्वमस्ति तद्धेतुः ॥ १३ ॥

अपरं च ।

त्वद्गेहं भूरिसम्पत्कृपणकथमभूद्बूहि तस्मिन् विचारं
कोसौ यच्चाव्ययानां वदति मतमनेकार्थतां पाणिनीयम् ॥
तच्छ्रुत्वा संविचार्य स्वयनहमभवं चाव्ययस्तद्विदित्वा
मह्यं स्वज्ञातिरित्थं सकरुणमभवत्साह्यभूतो नैकारः ॥ १४ ॥

अत्राहं मन्ये ।

भोगेनात्र परत्र सद्वितरणव्याजाद्वदान्यैः पुमान्
स्वर्वामाधारबिम्बचुम्बनकृते वित्तं करोत्यात्मसात् ॥
भुङ्क्ते नेन्द्रियलौल्यसम्भवभिया स्वभोगभीतो ध्रुवं
नो दत्ते सुविचारशीलनपरो योगीव लुब्धः पुमान्॥१५॥

ईदृशानामपि द्वारि पराशापरवशमनसः कवयोपि मुधैवायुर्व्ययं कुर्वन्ति । तदस्तु नामालमीदृशाधमवार्तया मुमुक्षुभिस्तु सुविशुद्धशान्त्याद्यखिलसद्गुणगणातिदारिद्र्यमुद्रितान् ब्रह्मादीनापि विहाय दीनबन्धुः स एक एव सेवनीयः केशवः ।

भवभुजगभीतिशमनः स्वजनवृजिनभञ्जनो विपद्दमनः ॥
क्षीराब्धिसुतारमणः शरणागतपालनः सुराधीशः ॥ १६ ॥

---

१ अव्ययानामनेकार्थत्वमिति पाणिनीय व्याकरणम् । २ अव्ययत्वात् ३ दाता ।

न केवलं ज्वरानिवृत्त्यर्थमेव कटुकाथस्येव भवतापनिवृत्यर्थमेव सेव्यत्वमस्य किंतु अतिसुभगतया मनोरमत्वादपीति ।

नीलाम्बुवाहद्युतिरम्बुजाक्षो निसर्गमन्दीस्मतसुन्दरास्यः ॥
कुन्दद्विजः पीनभुजः सुवक्षा मनोरमश्चिन्तयतां नतानाम् १७॥

किच अस्य हेरेराराधनेस्ति सर्वेषामप्याधिकारः ।

देवा वा दनुजास्तथा निशिचरा विप्राश्च शूद्राः स्त्रियो
ये चान्ये कुलकर्मजातिविकलाः पापाः कुयोनिस्थिताः ॥
ते सर्वेप्याधिकारिणोत्र भजने विष्णोस्त्रिधा सम्पत-
त्पादोद्भूतसरित्पवित्रितजगद्भारस्य भर्तुः श्रियः ॥ १८ ॥

किंच तस्यौपासनमार्गोपि नात्यायाससाध्यः ।

फलैर्वा पुष्पैर्वा नवकिसलयैर्वाथ सलिलैः
प्रसन्नैः सप्रेमप्रसरपरिदत्तैरपि सदा ॥
सदैश्वर्योद्रेकस्वसुखनिभृतस्तुष्यति हरि-
र्दयालुर्दीनानामनिशमतिशं दातुमुदितः ॥ १९ ॥

यस्यानवद्यगुणवर्णनपूर्तिमाप्तुं
शेषः सहस्रवदनोप्यनलं बभूव ॥
तत्रान्यपामरजनैः किल तस्य विष्णो-
रासाद्यते कथमनन्तगुणाब्धिपारः ॥ २० ॥

इति स्वानुभूतं वृत्तमत्यादरान्निवेद्य तूष्णींस्थिते तस्मिन् ह-

---

१ नीलमेघकान्तिः । २ निसर्गतः स्वभावतः । ३ कुन्दपुष्पवत् द्विजाद-न्ता यस्य स कुन्दद्विजः । ४ विकला विहीना इत्यर्थः । ५ नवपल्लवैः । ६ अ-तिशयेन कल्याणम् । ७ अपूर्ण यथातथा ॥

र्षिततनूरुहा महर्षय सहर्षं तमार्यवर्यं भृगुं मुनीन्द्रमभिनन्द्य स्वसत्रेन्यदेवतायजनमनादृत्य श्रीरमणचरणपरिचरणप्रवणान्तः-करणास्तमेवाराधयामासुः ।

सिद्धान्तितं निगमभूपतिना पुरैव
विष्णोः पदार्चनमनन्यमनन्यभक्त्या ॥
निर्णीय तत्तदनुवर्ति महर्षिवर्यै-
रादर्शितं सुखदमार्तिहरं नराणाम् ॥ २१ ॥
सर्वदा कमलोपेतं विचित्रपतनोचितम् ॥
कुपदाक्रमणाख्यातं मावरं भज मावरम् ॥ २२ ॥
नखधवलकान्तिरुणं चरणतल नीलमूर्ध्वमापे यस्य ॥
गङ्गा विधिजा यमुना स पुनातु हरेः पदप्रयागो माम्॥२३॥

इति रामकृष्णसूरिविरचितायां श्रीभार्गवचम्प्वां षष्ठस्तवकः॥६॥

—०:०—

सप्तमः स्तवकः ।

अथ वैकुण्ठात्तस्मिन् गतवति भृगौ तदा अत्युत्कटकोपानल-कीलाकलितकलुषतरान्तरा विप्रकृतनिजरमणावमत्यसहमाना सती सजलनयनपाङ्गावलोकनेन भगवन्मुखारविन्दमुदीक्षन्ती साञ्जलिभङ्गं साक्षेपं इदमवदत् ।

---

१ अद्वितीयम् । २ पृथिव्याः पदेनाक्रमणेन ख्यातम् । ३ लक्ष्मीपतिम् ।४ मा अवर इतिछेदः । ५ पदोपरितनोभाग । ६ कीला ज्वाला । ७ अवमतिः अपमानः ।

द्विजोयमुन्नद्ध इवाजपुत्रो निरागसः शान्तिसुखैकधाम्नः ॥
मदा त्वहन्वक्षसि तेन्धबुद्धिर्निरङ्कुशा विप्रजना हि नूनम्॥१॥

हेकान्त तदेतद्वाक्यविनिपातेनादयं दण्ड्यो नोचेदहमितो गच्छामीति । ततो ब्रह्मण्यदेवो हरिः ।

निगमागमखगनीडं वाडवकुलमुज्ज्वलं ममैव सुखम् ॥
कथमुत्सहेपकर्त्तुं तदहं तद्विपादे मद्विपदायिते ॥ २ ॥

विप्रमोहमराक्रान्तस्वान्तोहं त्वमपि प्रिये ॥
विप्रवासफलं तस्मान्मम तेपि च निश्चितम् ॥ ३ ॥

यद्यपि त्वं हठादेव मामुत्सृज्य गमिष्यसि ॥
तेषामाशीर्वचःपाशबद्धैव पुनरेष्यसि ॥ ४ ॥

इत्येवं भगवद्वचनसंवर्धितामर्षधर्षितहृत्कमला कमला ।

मत्तोपि यदि ते नूनं मतो विप्रजनः प्रियः ॥
तस्य सद्मनि नैवाहं वसामि तवँ तन्मतेः ॥ ५ ॥

एवमुक्ता सरभसं रुषा वैकुण्ठान्निर्गत्य करवीरक्षेत्रं भुवि निवासाय रोचयामास । ततो भगवानपि तस्मात्कलहान्तरितरमानुनयार्थमादिवराहाध्यासितं अशेषशैलमौलिं शेषाचलमंशेन गत्वा तदनुमतेन तपश्छलात्तत्र निवासमकरोत् । इतः सर्वतः । सुभगतमे वैकुण्ठेपि स्वरूपानन्दनिवृत्तव्यामोहप्रसरः सर्वदात्मारामः परिपूर्णोपि रमाविरहव्यालातिव्याकुलीकृतमना मनागपि शममलभमानो मानवतीं तामेव दूयमानेन मनसा चिन्तयन् स्वभवनत्यागोद्यतमतिरासीत् ।

---

१ वेदशास्त्ररूपखगानां वसतिस्थानम् । २ ब्राह्मणकुलम् । ३ चेत्यस्याध्याहारः ।

प्रेमाविलमतिविमलं सत्कुलमकलङ्कशीलमनुकूलम् ॥
लावण्यसरःकमलं सरलमलं किल कलत्रमिह विरलम् ६

ततः श्रीकान्तः स्वकान्ता क्व नु गतेति वितर्क्य निश्चिनोति।

वर्णनीयान्वयभुवां साध्वीनां सुन्दरभ्रुवाम् ॥
पितुर्वा पत्युरागारं गतिरन्यानयावहा ॥ ७ ॥

तन्नूनं क्षीरनिधेः स्वपितुरेवालयं गतेति निश्चित्य प्रमदासक्तचित्तानामेव व्यवस्थितिरिति लोकान्निदर्शयन्स्वयमेव क्षीराब्धिमुपजगाम । तत्रापि तामदृष्ट्वातिश्रान्ततया शेषपर्यङ्के क्षणं प्रस्वापदत्तावसरोभूत् । तत्रावसरे ।

दैत्यांशोद्भवभूरिभूपति चमूचक्रार्दितां गामिमा-
मादाय त्रिदशात्रिनेत्रविधयस्तीरं ययुः क्षीरधेः ॥
कृत्वाग्रे विधिमद्भुतामलपदस्तोत्रैः शनैरच्युतं
विध्वस्तस्वपदाश्रितापदमलं भक्तेष्टदं तुष्टुवुः ॥ ८ ॥

ततः कृपालुर्भगवान् उर्व्यां यदुकुले सर्वेपि सुपर्वाणस्तत्पत्न्यश्चांशेन सम्भवन्तु । ततः सहस्रवदनावामपि शौरिनायोरेपत्यतामुपेत्य भूभारं क्षपयिष्यावः । योगमायापि कार्यवशेन नन्दसद्मनि जनिष्यते इत्येवं ब्रह्माणमादिदेश ।

असंनिधानात्पद्मायास्तदानीं जगदीश्वरः ॥
तज्जन्मकथनं नैव कृतवान् परमेष्ठिने ॥ ९ ॥
हरेः स्ववृजिनान्नानं भक्तदुःखं सुदुःसहम् ॥
अतस्तदवमुच्यापि श्रितत्राणार्थमुद्यतः ॥ ११ ॥

---

१ सुकुलजानाम् ।

ततो देवान्प्रभूतं निवेद्य वसुन्धरामाश्वास्य वेधाः स्वधाम प्रत्यपद्यत। देवाश्च सर्वे प्रभोरादेशं तस्थुः । शेषोपि शौरिपत्न्यां रोहिण्यामवततार । ततः ।

मायामादिश्य हृप्यद्दनुजनिकदने चण्डदोर्दण्डसारः
शौरेः क्षेत्रेथ साक्षात्स्वयमतुलैगुणैः प्रादुरासीदजन्मा ॥
लीलाविध्वस्तकंसाद्यखिलखलमदः प्राप्त दारानुदारा-
न्पार्थानापद्विमुक्तानकृत परिहरन् भारमुर्व्यां मुरारिः ॥१२॥

श्रीरपि भीमनृपसुता भूत्वा तदवाप्तयेऽनुरागवती ॥
हरये द्रुतं समहिनोच्छुभकरवीरप्रियाहामिति दूनम् १३

ततः कदाचिद्द्वारवत्यां विविधकामकलाकलापोपकरणालंकृतसद्मनि मकरध्वजवह्निविध्वस्तधैर्यद्रुमसुधामिवाधाय राधामङ्के पर्यङ्के निशङ्कं पुलकाञ्चिताङ्गया तया सह दिव्यं तन्निजदयितमवेक्ष्य रोषदूतहृदयसद्मा पद्मा निश्वसन्ती पुनस्तत्सद्म संत्यज्य लोहदण्ड[2] निर्जगाम ।

अपराधे प्रकुप्येत मयि श्रीरिति तद्भयात् ॥
हरावनपराधेपि रुष्टातो लोहदण्डभाक् ॥ १४ ॥

ततः श्रितजननिर्जरतरुः श्रीपतिरपि तद्विरहपरिश्रान्तस्वान्ततया विहाय स्वान्त.पुरं तदनुनेतुकामस्तामन्वेषयन्ननेकगिरिसरित्कान्ताराण्यतिविदितावगालितवत्सनद्यो दिग्वसन एव वल्कीकृताङ्गदः श्रीवैजयन्तीमीनकुण्डलालंकृतो भार्गवपदमुद्राङ्कितो-

---

१ शुभकरोयो वीरो विष्णु. स एव प्रियो यस्य । शुभ यत्करवीर नाम क्षेत्र तदेव प्रिय यस्या इति वा । २ एतन्नामक क्षेत्रम् ।

रस्थलः स्वप्रियां श्रियमुपलभ्य सानन्दं सान्त्वयामास । तत्रापि विकलानुनयश्चिन्तयामास ।

गृहिणी गृहमित्याहुस्तदर्थं वित्तसद्मनी ॥
सा विरक्ताथ किं तेन धनेन सदनेन मे ॥ १५ ॥

तदत्र पुण्यतमक्षेत्रे सर्वस्वव्ययेनाहमपि तद्रूपश्वरामीति । तत्रावसरे ।

पितृभजनलीनमनसं मुनिवरमिह पुण्डरीकनामानम् ॥
वृत्वा पुरोधसं निजहृद्गतमस्मै निवेदयाञ्चक्रे ॥ १६ ॥

ततः सोपि पात्रापात्रविचारेणास्येशस्य प्रभूतवित्तव्ययः कथं स्यादिति विचार्य परमकारुणिको मुनिः । ज्ञानविज्ञानहीनानां मूढानां पापिनामपीत्यादिना मोक्षमुपलक्षीकृत्य मद्दत्तासने तिष्ठन्नेव सर्वस्वं प्रतिपादयेत्युपादिष्टवान् ।

तिष्ठन्नेवेत्युक्तं मुनिना यत्तत्र हेतुरयमेव

दीनाः सुदवीयांसोप्यस्य कृपालोकगोचराः सन्तु ॥ १७ ॥

मद्दत्तासन इत्यत्र हेतुर्यत्कृपया द्विजैः ॥
दत्तं तदचलं चास्य त्यागानर्हमपि स्फुटम् ॥ १८ ॥

तद्वाग्बन्धः स्वसिद्धामलविमलकलापालिताशेषलोकः ।
शोकघ्नः स्वांश्रितानामिति मुदितमनाः पुण्डरीकेण दत्ते ॥
तिष्ठन् पीठेष्टसिद्धित्रिदशविधिमुखावासवैकुण्ठसम्प-
त्सायुज्यादिप्रदानोप्यतमतिरजितो राजते दीनबन्धुः ॥१९॥

द्विजेन पुण्डरीकेण दर्शितेनाध्वनैव यत् ॥

---

१ गुरुम् ।

यात्यतः पुण्डरीकाक्षं मेनेहं विट्ठलं विभुम् ॥ २० ॥

नामान्यस्य हरेः श्रुतिस्मृतिगणैरुक्तानि गौणान्यपि
प्रोद्गीतानि महात्मभिः प्रतिपदं तिष्ठन्त्यलं कोटिशः ॥

तत्राप्यत्र किलाद्रादुपनिषद्गीतश्रवाश्रीपति-
र्दीनानामनुकम्पयैव विदधे श्रीविट्ठलेत्याह्वयम् ॥ २१ ॥

जघनाहितपाणिरुन्नतांसो मृदुमन्दस्मितसुन्दरास्यचन्द्रः ॥
समचारुपदेक्षणः शरण्यः स तु मां पातुतमां तमालनीलः २२

तदारभ्य अयं क्षेत्रराजोपि अघविध्वंसनस्य श्रीनिवासस्य निवासादघविध्वंसनः । श्रीनिवासश्चाह ।

ये मन्दाः स्वकलत्रपुत्रकनकाद्यासक्तचित्ताः सदा
यात्रामत्र विधातुमक्षमतया नैवागताः कर्हिचित् ॥
तेपि सोद्यमसम्भ्रमादपि बलाद्श्रद्धया दूरतो-
प्येनं वीक्ष्य यदृच्छयापि च सकृद्धन्याःस्युरुत्कलमषाः२३
यात्राद्वयमिहेशस्य दिवसे मासि वत्सरे ॥
नियमेनानुतिष्ठन्ति तेऽपुनर्भवभागिनः ॥ २४ ॥
शुचावप्यत्र सङ्गत्य शुचि तिष्ठन्ति कि जनाः ॥
श्रीविट्ठलकृपालोकात् विशोकाः सभवन्त्यमी ॥ २५ ॥

किंच ।

पदजा यदविच्युता जडाधःपतना वक्रगतिश्च जाह्नवीयम् ॥
समतां किमु पुण्डरीकनाम्ना किल जह्नुद्विजसूनुना समेति२६

अपि च ।

१-विदा ज्ञानेन ठान् शठान् लाति गृह्णाति इति विट्ठलः । २ आषाढे । 3 शुचि यथातथा ।

मुकुन्दमुचुकुन्दयो रहसि संविदं ब्राह्मणे-
रवाप्यमितरत्र नैवामिति यच्च सिद्धान्ततम् ॥
तदत्र पदमूर्जितं जगति सूकरेणार्जितं
प्रदक्षिणविधानतः सपदि पुण्डरीकालये ॥ २७ ॥
किं पुनः क्षेत्रराजस्य प्रदक्षिणविधौ फलम् ॥
जानाति दिवि वा भूमौ विबुधोपि न कश्चन ॥ २८ ॥

किंच ।

दशशतवदनोप्यलं न वक्तुं भवतनुजामहिमानमत्र यस्याम् ॥
स्वदृजिनपरिमार्जनाय सद्यः समभिसरन्ति हि मध्यमेहि नद्यः २९

अपि च ।

भीमापि या विबुधजनकमनीया तदपि न स्वरबलेयम् ॥
सुजडापि वेणुनादानुसरणशीलापि बल्लवी नैव ॥ ३० ॥
गुर्वी तीर्थानामपि नीचपथालम्बिनी न पतितेयम् ॥
भवतनयापि भवघ्नी तदपि न पितृघातिनीति चित्रमिदम् ३१
क्षेत्रेषु तीर्थेषु च दैवतेषु भक्तेषु सर्वेष्वपि संगरिष्ठम् ॥
श्रीपुण्डरीकं त्वथ चन्द्रभागा श्रीपाण्डुरङ्गो मुनिपुण्डरीकः ३२

वृन्देहं सम्पूरीतमन्देहं देवमस्तसंदेहम्(?) ॥
किं देहं भरभजनैः किं ते त्वं ते क्षमाः पारित्रातुम्॥३३॥

बहवः सन्ति सुमनसः स्विष्टा इह कामदाः सकामानाम् ॥
धर्मार्थमोक्षवितरणपटुरेको जयति विट्ठलो जगति ॥ ३४ ॥

---

१ भीमानाम्नी भयकरा च । २ स्वर्गाङ्गना शब्दकारिणी च । ३ डलयोः सावर्ण्यात् सुजला इत्यपि । ४ भवः संसारः शिवश्च ।

वन्दे देवाधिराजामणिं कलिमलप्रध्वंसदक्षं रमा-
नाथोद्वासिनमालिमानसलसद्राजीवरोलम्बकम् ॥
यश्चित्तं मुनिपुण्डरीकवत्तसा बद्धोप्यविद्यागुणै-
र्बन्धानुद्धरते नरान्नयवतो दीनान् दयाम्भोनिधिः ॥ २५ ॥
अविरतमनुकम्पाकम्पदीपोरुकान्ति-
प्रशमिततपापध्वान्तपङ्क्तिः समन्तात् ॥
विधिविबुधमुनीन्द्रै सेव्यमानाङ्घ्रिपद्मः
सजलजलदनीलं विट्ठलं तं नतोस्मि ॥ २६ ॥
आस्तामेतत्सदुपनिषदां हृद्यमाद्य मुविद्यै-
रावेद्यं यत्किमपि तमसः सन्निविष्टं पुरस्तात् ॥
अम्भोदाभं समपदकटिन्यस्तहस्तं स्मितास्यं
तिष्ठद्बल्यङ्गदमिह मनस्याविरास्तांमिदं नः ॥ २७ ॥
सान्द्रग्रावेन्द्रनीला किल बहलरजःसंनिहन्त्री जनित्री
सत्त्वानां स्वप्रभावाच्छशितरणितिरस्कारिणी तापहन्त्री ॥
सानन्दा नीलकण्ठाद्यभिमतरचिताविट्कलाख्यानुकम्पा
पृथोभिस्तर्पयन्ती हृदि वसतु मुदे कापि कादम्बिनी मे २८

पतगपतितुरङ्गः कुञ्जकेलिप्रसङ्गः
कृतनतभवभङ्गः सन्मनःकञ्जभृङ्गः ॥
करविधृतरथाङ्गः पार्वतीशान्तरङ्ग-
श्छविविजितपतङ्गः पातु मां पाण्डुरङ्गः ॥ २९ ॥

स्निग्धेन्द्रनीलमणिपाषाणवन्नीला ।

इत्थं वा कुसुमैर्मयाल्पमतिना चम्पूरियं निर्मिता
नार्हन्ते वनमालिनास्त्वति वरं व्रीडाजडीभूतधीः ॥
तावत्तत्स्मृतिमागत तव वचो यद्यत्करोषीत्यहं
तेनावाप्तधृतिस्तवाङ्घ्रिकमले तामर्पये त्वन्मुदे ॥ ४० ॥
कथं वासौ मद्वाक् तव गुणगणौघं गणयितुं
क्षमा क्षामा[1] क्षामीकृतदनुजदर्पाहिकशिपो[2] ।
तपः सम्पत्पूतामितमतिमदैश्वर्यमपि य-
द्यशःपारावारे रज इव निमग्नं महदपि ॥ ४१ ॥
न जानेहं पातञ्जल[3]कपिलकाणादकमुनि-
प्रबन्धान्नाधीतं नतवरदसारस्वतमपि[4] ॥
तथाप्यद्धा वद्धाः पितरमिव तोक[5]स्य नितरां
गिरो मे रोमाञ्चाञ्चितमर्थं भवन्तं विदधतु ॥ ४२ ॥
न विज्ञातं ज्ञेयं नहि तव च भक्तिर्न विरति-
स्तमस्त्यागे योगः स्वहितमथकर्मापि न कृतम् ॥
असह्यान्यायानां खनिरवनिभारोस्मि सदयं
दयाब्धे यद्युक्तं तव कुरु तदेवार्थिनि मयि ॥ ४३ ॥
गुणानामन्तस्ते न निगमपुराणागमशतै-
स्त्वया वा विज्ञातस्त्वमसि तदनन्तः किल यथा ॥

---

१ क्षामा अतिलघु । २ क्षामीकृता नाशिताः । ३ पातञ्जल व्याकरण कपिलेनोक्तं सांख्य कणादेनोक्त तर्कशास्त्रम् । ४ सारस्वतमपि व्याकरणम् । अथवा अलंकारादि । ५ बालस्य ।

तथा मे दोषाणामतसिसुमसाधारणरुचे
नचेद्दीनं मामुद्धरासि वद कोन्योस्ति सदयः ॥ ४४ ॥

पिता माता भ्राता तनुजनिरुपास्यः प्रियतमो
गुरुस्त्राता मित्रं[2] सुहृदपि[3] भवानेव भगवन् ॥

दयालो दीनोयं त्विति दयय मामुद्धर हरे
हरे मां संसारव्यसनततिमादर्शय पदम् ॥ ४५ ॥

आर्त्तोद्धारपरायणत्वमिह ते नैसर्गिकं तद्भवान्
दीनं मां द्रुतमुद्धरिष्यति भयादित्यस्ति मे प्रत्ययः ॥
कैश्चित्किंकिललोकलोचनतमःशान्त्यर्थमभ्यर्थित-
स्तेजोराशिरसौ सहस्रकिरणः प्राचीदिगन्तर्गतः ॥४६॥

भासत्सद्गुणधर्माणि त्रिजगतां पापापनुत्कर्माणि
स्वेषामार्पितशर्माणि श्रुतिमतोद्यद्धर्मभृद्धर्माणि ॥
शश्वत्पालनधर्माणि प्रियरहः क्रीडेन्दिरानर्माणि
प्रज्ञाताखिलमर्मणीह रमतां द्वद्विट्कुले ब्रह्मणि ॥ ४७ ॥

यत्सेव्यं तदसेव्य नासेव्यमिति किमर्थना(?) ॥
इति निजमौग्ध्यविलज्जितबुद्धेर्मे तत्क्षमन्तु सत्कवयः॥४८॥

श्रीमद्विट्कुलपादपद्मविगलत्पीयूषधारारस-
स्वादासक्तविविक्तचित्तमधुपश्रीरामसद्वंशभूः ॥

---

१ अतसि नाम 'जवस' इति भाषायाम् । २ अन्योन्योपकारक मित्रम् । ३ उपकारमनपेक्ष्योपकारी सुहृत् ।

ख्यातस्त्र्यम्बक इत्यथास्य तनयः सद्रामकृष्णाह्वय-
श्चम्पूकाव्यमिदं चकार स हरेर्दासोपनामा कविः ॥४९॥

हठतेन निदेशेन ह्यनीशेनापि यन्मया ॥
कृतं युक्तमयुक्तं वा श्रीविट्ठलनुदेस्तु तत् ॥ ५० ॥

येनेत्थं यत्प्रीत्यैकाव्यमिदं कृतमतीव रसयुक्तम् ॥
तस्मिन्कवौ स विष्णुर्वत्सतरे गौरिवास्तु सुप्रीतः ॥५१॥

इति श्रीमद्वृक्षशिखामणिश्रीमद्रामान्वयसम्भूतत्र्यम्बकसुतराम-
कृष्णविरचितभार्गवचम्प्वां सप्तमः स्तबकः ॥ ७ ॥

समाप्ता चम्पूः ।

मुद्रितमेतन्मुम्बय्यां गोपालनारायणजनतया स्वकीये मुद्रा°

जाहिरात.

काव्यग्रंथाः

	नाम.	रु०	आ०	म०
	गीतगोविंदसटीक राधाविनोदसह ..	१		६
	रघुवंशसटीक *	२		।•
२४१	रघुवंशसटीक बारीक *	१		६
२४२	कुमारसंभव *	२		।•
२४३	माघकाव्यसर्ग १-२-३	॥•		६
२४४	किरातार्जुनीयकाव्य *	२॥		।॥
२४५	भोजप्रबंध	।॥•		६
२४६	भर्तृहरिशतकत्रयसंस्कृतटीका और भाषाटीका	१।		६
२४७	" वैराग्यशतक " ...	।॥•		६
२४८	गीतगोविंदमूळ	।•		।॥
२४९	हितोपदेश *	॥•		६
२५०	रामकृष्णविलोमकाव्य	।•		६
२५१	गंगालहरी सटीक	।•		६
२५२	कृष्णकर्णामृत	।—		६•
२५३	दशकुमारचरित्र * ..	१॥		।॥
२५४	भामिनीविलास ..	।•		६॥
२५५	मेघदूतकाव्य *	॥•		६
२५६	पद्यावलीअनेकमहानुभावोंके संगृहीतश्लोक	॥•		६
२५७	सटिप्पणीकं कविरहस्यं	।—		
२५८	कृष्णामृततरंगिकासटीका	।—		
२५९	चौरपंचाशिका टिप्पणीसहिता ...	६		
२६०	कलिविडंबनम्	६		
	सौन्दर्यलहरी	६		
	कटाक्षशतकम्	६		८।
	भाव शतकम्	६		८॥
	प्रेमशतकम्	६		८॥